PK Pātañjali
531 Mahābhāsyapradīpodyotah
A15
1899
v.2
pt.3

[redacted]

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	Rs. 5	0
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 and 3 Indexes; Vol. III, Fasc. 1 @ /12/ each	12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each	1	8
Riyāẓu-s-Salāṭīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Fasc. 1–14 @ /12/ each	10	8
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...	2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...	2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..	6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3. Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4. Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5. Anīs-ul-Musharrahīn	3	0
6. Catalogue of Fossil Vertebrata	3	0
7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9. Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10. Khizānatu-l-'ilm	4	0
11. Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13. Sharaya-ool-Islām	4	0
14. Tibetan Dictionary, by Csoma de Körös	10	0
15. Ditto Grammar „ „	8	0
16. Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0
17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson...	1	0
18. Memoir on maps illustrating the Ancient Geography of Kaśmīr by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899	4	0
Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

20–6–1901.

Books are supplied by V.-P.P.

	Rs.	As.
Pariçista Parvan, (Text) Fasc. 1–5 @ /6/ each	1	14
Prākrita-Paingalam, Fasc. 1–6 @ /6/ each	2	4
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Laksaṇam, (Text) Fasc. 1	1	8
Parāçara Smrti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each	7	8
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 14–45 @ /6/ each	12	0
Tāṇdya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each	14	10
Trikāṇda-Maṇdanam, (Text) Fasc. 1-2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	1	14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-4 @ /6/ each ...	1	2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
Varsa Krya Kaumudi, Fasc. 1–4 @ /6/	1	8
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	8
Visṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–6	2	4

Tibetan Series.

	Rs.	As.
Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each	13	0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each	10	0

Arabic and Persian Series.

	Rs.	As.
'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–3 @ /12/	2	4
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, 1–6 @ 1/ each	6	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of Arabic Books and Manuscripts	1	0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each	1[illegible]	
Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each		

* The other Fasciculi of these works are out of stock, and complete co[illegible] be supplied.

न ह्रीति। (भा)

अस्य "अवतिष्ठते" इत्यनेनान्वयः। किन्तु परिणमन्त एवेति शेषः॥

तच्चोभयमिति। (भा)

वृद्ध्यपचयरूपमित्यर्थः॥

सर्वत्रेति। (भा)

पदार्थे इत्यर्थः। सर्वदा इत्यपि बोध्यम्॥ कैयटे

गुणानामिति। (कै)

शब्दादीनामित्युपलक्षणं सत्त्वकार्य्यमात्रस्य अन्यथा शब्दे लिङ्ग व्यवहारे न स्यात्॥ तासां लिङ्गत्वे प्रमाणं दर्शयति

शब्दैकेति। (कै)

शब्दजन्यबोधविषया इत्यर्थः॥ अप्रवृत्तिधर्मत्वेऽपि स्वतो लिङ्ग-रहितत्वेऽपि

अन्यप्रवृत्त्यनुयायित्वादिति। (कै)

परिणामवदन्यदात्माध्यासेन तत्परिणामानुयायित्वादित्यर्थः।

द्वित्वेन कदाचिद् बहुत्वेन कदाचित् स्त्रीत्वेन कदाचित् पुंस्त्वेन कदाचिन्न-पुंसकत्वेन॥ भवेल्लिङ्गपरिहार उपपन्नो वचनपरिहारस्तु नोपपद्यते। यदि हि कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्द्वित्वेन कदाचिद्बहुत्वे-

---

न च तदनित्यत्वं लिङ्गवचनसिद्धौ हेतुरुपपद्यत इति प्रश्नः॥ प्रकरणादर्थ-निश्चय इत्याह। नेत्याहेति। भा॥ वचनपरिहारस्त्विति। भा॥ लिङ्ग-परिहारे न किंचिद् दुष्यति वचनपरिहारे त्वभिधीयमाने एकाकृतिरिति

भाष्ये तु "स्त्रियाम्" (४।१।३) इति सूत्रे प्रकारान्तरमुक्तम्॥

इदमुपलक्षणं सत्त्वादिकार्य्यमात्रस्येति बोध्यम् ॥ उपलक्षणत्वं ध्वनयन्नुक्तयोर्व्याप्तिमाह

सर्वाश्चेति ॥ (भा)

मूर्त्तयः । (भा)

पदार्थाः ॥

एवमात्मिका (भा)

इत्यस्य विवरणं "संख्याने"त्यादि ॥ "गन्धवत्य" (भा) इत्यन्तं पृथिव्यपेक्षयाप्सु अल्प अप् पृथिवी भा तेजसि अल्पे इत्यल्पीयांसः इत्यत्र इत्युपलक्षयणं वायौ रूपाभावात्। आकाशे स्पर्शस्याऽप्यभावाच्च। वस्तुतः तेजोवद् (त्र। इ) रूपाणां सर्वमूर्त्तीनां त्रिवृत्करणमात्राभिप्रायेणेदमुक्तम्। वाय्वाकाशशब्दवाच्ययोः लिङ्गव्यवहारस्तु ईश्वर इव स्वकार्य्यतेजो (वन्न। इ) वद्गतोपचयारोपेणेति बोध्यम् ॥

प्रवृत्तिः खल्वपीति । (भा)

परिणाम इत्यर्थः ॥ प्रतिक्षणपरिणामित्वाद् वस्तूनां

उपायिनश्च। किं य एते शुक्लादयः। नेत्याह। स्त्रीपुंनपुंसकानि सत्त्वगुणा एकत्वद्वित्वबहुत्वानि च। कदाचिदाकृतिरेकत्वेन युज्यते कदाचिद्-

---

सिद्धिरित्यर्थः ॥ अनित्या इति। भा। कदाचित् स्त्रीत्वयुक्तेन पिण्डेनाकृतिर्व्यज्यते कदाचित् पुंस्त्वयुक्तेन कदाचिदेकाधारस्था प्रतिपाद्यपे कदाचिदनेकाधारस्थेत्यर्थः ॥ किं य एत इति। भा। ते हि गुणत्वेन प्रसिद्धा

उक्तं च हरिणा,—

"तिस्रो जातय एवैताः केषांचित्समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः" इति ॥

ब्राह्मणी दारा इत्यादौ द्रव्यदाराजातेर्लिङ्गान्तरेण योगो न स्यात् तटस्तटीत्यादौ च कस्यापि लिङ्गस्य योगो न स्यादिति भावः। शब्दविशेषापेक्षया तु जातेराविष्टलिङ्गत्वोक्तिरिति तात्पर्य्यम् ॥ भाष्ये

कृतान्तः । (भा)

सिद्धान्तः ॥

किमिति । (कै)

संस्त्यानप्रसवशब्दयोः कोऽर्थ इति प्रश्नः॥ उत्तरं संस्त्यानेऽभिधेये स्त्यायतेर्ड्रट्प्रत्ययान्तस्त्रीशब्द (उणादिसू-६०५) इत्यर्थः। सूतेः सप्सकारस्य पकार इत्यर्थः। प्रसवेऽभिधेये पुमानितिशब्दः। गर्भः शुक्रं स्त्यायति शोणितेन सङ्घीभवतीत्यर्थः॥ सूते शुक्रं त्यजति योनिरूपे आधारे। स्त्यानमपचयः। प्रवृत्तिः वृद्धिः॥

शब्देत्यादि । (कै)

मुक्तसंशयं भवति। आकृतावपि पदार्थे एकशेषो वक्तव्यः। अक्षाः पादाः माषा इति॥ लिङ्गवचनसिद्धिर्गुणस्यानित्यत्वात्। वा॥ लिङ्गवचनानि सिद्धानि भवन्ति। कुतः। गुणस्यानित्यत्वात्। अनित्या गुणा अपायिन

सर्वगतत्वेऽपि पदार्थानां विचित्रशक्तियोगात्॥ कश्चित् पदार्थः कांचिदेवाकृतिमभिव्यनक्ति न तु सर्वां सर्वः। गुणाश्चात्र द्वित्वस्त्रीत्वादयो विवक्षिताः तैश्चाकृतेरेकार्थसमवायलक्षणः सम्बन्ध इत्याकृतावपि पदार्थे लिङ्गसंख्या-

---

इति षष्ठान्त्याधिकरणन्यायेन पुंस्त्वस्य नियमो बोध्यः। छागशब्दस्य लौकिकपुंस्त्वविशिष्टपारिभाषिके शक्तत्वादिति दिक्। तच्च जातिन्नयमित्येके।

आविष्टलिङ्गेति । (कै)

स्वाश्रयानेकलिङ्गसत्त्वेऽपि स्वयं किंचिदेकमेवोपादत्ते तथा चानेकलिङ्गत्वासिद्धिरिति भावः ॥ उक्तमेवार्थं दृष्टान्तेनाह

ततश्चेति । (कै)

न चैवं लिङ्गस्यासिद्धिः कुतः ब्राह्मणीशब्दवाच्यया जात्या आश्रयगतं स्त्रीत्वमेवोपादीयते ब्राह्मणशब्दवाच्यया पुंस्त्वमेवेति व्यवस्था सम्भवादिवाच्यं ब्राह्मणीपदार्थः । इयं ब्राह्मणव्यक्तिः । इदं ब्राह्मणवस्तु ब्राह्मणीदारा इत्यादिव्यवहारानुपपत्तेरित्याशयात् ॥

सिद्धान्तत्वादीति । (कै)

आकृतिवादीत्यर्थः ॥

स्तनकेशादीति । (कै)

केशो भगम् ॥

लिङ्गान्तरेणेति । (कै)

स्यात् ॥ अस्ति च वैरूप्यम् । वा ॥ अस्ति खल्वपि वैरूप्यम् । गौश्च गौश्च खण्डो मुण्ड इति ॥ तथा च विग्रहः । वा ॥ एवं च कृत्वा विग्रह उपपन्नो भवति । गौश्च गौश्चेति ॥ व्यर्थेषु च मुक्तसंशयम् । वा ॥ व्यर्थेषु च

पक्षपरिग्रहः तदेव न सिध्यति न हि शकटाश्वदेवनाश्वादिष्वेकाकृति-सद्भावः । इदानीमाकृतिवादीदोषान् परिहर्तुमाह लिङ्गेति । भा । आकृतिः सद्भावः पूर्वमेव । प्रत्यक्षानुमानागमप्रवृत्तिभिः प्रतिपादितः ।

वा मन्त्रवर्णात् ” (पूर्वमीमांसासू–३१ । अध्या–६ । पा ८ । अधिक–८)

गुणस्येति। (भा)

जातावेकवचनम् ॥

अनित्या इति। (भा)

अनियता इत्यर्थः ॥ अपायित्वोपायित्वाभ्यामनियतत्वमेव भाष्ये दर्शितम् ॥

बहुवचनवदिति। (कै)

आश्रयगतसंख्यावत् आश्रयबोधे दृष्टानेकशब्दत्वमपि प्राप्नोतीत्यभिमानः ॥

जातिर्व्यपदिश्यत इति (कै

यव इत्येक वचनेन तच्च जातिप्राधान्यावगमादिति भावः। एवं चारोपितद्वित्वादिना न प्रतिज्ञाहान्यादीति तात्पर्य्यम् ॥

अभ्युपगममिति। (कै)

गौण्युत्तरासंख्या पूर्वां संख्यां बाधत इति भावः ॥

लभ्यते। न ह्येको देवदत्तो युगपत् स्रुघ्ने भवति मथुरायां च ॥ विनाशे प्रादुर्भावे च सर्वं तथा स्यात्। वा ॥ किम्। विनश्येच्च प्रादुःष्याच्च। श्वा मृत इति श्वा नामलोके न प्रचरेत्। गौर्जात इति सर्वं गोभूतमनवकाशं

भेदौ विरुद्धौ उपपद्येते इत्यर्थः। एकार्थक्रियाकारित्वादिनिमित्तस्तु प्रत्यभिज्ञाप्रत्ययः॥ गौश्चेति। भा। भेदाधिष्ठानः समुच्चयः। सामान्यस्यैकत्वाभिधेयत्वयोर्न स्यादित्यर्थः॥ व्याकृतावपीति। भा। यदर्थं व्याकृति-

---

द्दोषः कथं योज्यः। पारिभाषिकस्याव्यावर्त्तकतया तद्विवक्षाया अकिञ्चित्करत्वात्। लौकिकस्य तु पशुशब्दादप्रतीतेरिति चेत्। सत्यम्। "छागो

मुक्तसंशयमिति। (भा)

एकशेषाङ्गीकरणमिति शेषः॥ जात्यभावो व्याडिमते उक्तस्तं निरस्यति

आकृतिसद्भाव इति॥ (कै)

"अथवा" इत्यादिना व्याख्यातं सर्वगोभूतमित्यादिदोषं परिहरति

सर्वगतत्वेऽपीति। (कै)

संकरोऽपि न। परस्परपरिहारेण भिन्नवस्तुनिष्ठानामेवैकत्र-स्थितेः संकरत्वात् न स गोत्वादीनामिति भावः॥ आद्य व्याख्या-रीत्या दोषस्तु जातेः प्रत्येकं परिसमाप्त्यङ्गीकारेण सुद्धरः। एकैक-व्यक्तिव्यङ्ग्यत्वाच्च न विनाशेत्यादि दोषः॥ ननु "सर्वामिति" (कै) यथात्मनां व्यापकत्वेऽपि क्वचित् शरीरे कश्चिदेवात्मास्फुरति न तु सर्वः सर्वत्र तद्वदित्यर्थः॥

एकार्थसमवायेति। (कै)

तेन च निमित्तेन जातौ लिङ्गसंख्यारोप इत्यर्थः॥ भाष्ये

चोदितायां द्रव्य आरम्भणालम्भनप्रोक्षणविशसनादीनि क्रियन्ते॥ न चैक-मनेकाधिकरणस्थं युगपत्। वा॥ न खल्वप्येकमनेकाधिकरणस्थं युगपदुप-

---

इति दोषापत्तिः। ततश्च। व्यक्तौ चैकत्र सा व्यक्त्याऽभेदात् सर्वत्र सा यदि जातिर्दृश्येत सर्वत्रेति सर्वेषु पदार्थेषु गोप्रत्ययप्रसङ्गः॥ नास्ति च वैरूप्यमिति। भा। तस्माद् द्रव्यमेवास्तु न तु सामान्यं न ह्येकस्य भेदा-

---

मन्यथा कुमारी कुमार इत्यादयः प्रयोगाव्यवतिष्ठेरन्। करेणुरिभ्यां स्त्रीनेभ इत्यमरस्याप्ययमेवार्थः॥ नन्वेवं पशुनेति पुंस्त्वं विवक्षितमिति मीमांसको-

न हीति। (कै)

एवं च तत्तच्छब्दप्रतिपाद्ये एकस्मिन् विरुद्धधर्मोपपत्तेरभावाद्द्रव्यमेव पदार्थ इति भावः॥ भाष्ये गौश्च गौश्च इत्यनेनाभिप्रेतवैरूप्यमुपपादयति।

भेदेति। (कै)

एवं खण्डो गौर्मुण्डो गौरिति च न स्यादिति भावः॥

प्रत्यभिज्ञाप्रत्ययः। (कै)

तद्विषयप्रत्ययः॥ भाष्ये

अस्ति च वैरूप्यमिति (भा)

वाक्यस्य च शब्दं व्याचष्टे तथा च

विग्रह इति। (भा)

एकार्थत्वे पर्य्यायाणामिव सहप्रयोगो न स्यादिति भावः॥ भाष्ये

व्यर्थेष्विति। (भा)

विजातीयानेकार्थसरूपशब्देष्वित्यर्थः॥

चोदनासु च तस्यारम्भात्। वा। चोदनासु च तस्यारम्भान् मन्यामहे द्रव्यमभिधीयत इति। गौरनुबन्ध्योऽजोऽग्नीषोमीय इति। आकृतौ

अनवकाशमिति। भा। पदार्थान्तरप्रत्ययस्यावकाशाभावात्। अथवा सर्ववस्तु व्यापि गोत्वमेवेष्टव्यम्। अन्यथा—

नायाति न च तत्रासीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वं नाधारमहो व्यसन सन्ततिः॥

विशिष्टे शास्त्रीये पुंस्त्वे शक्ताः लौकिकस्त्रीत्वविशिष्टे च शास्त्रीयस्त्रीत्वे। कथ-

अस्ति पश्चादिति। (कै)

यतः पश्चादेवास्ति अतः पूर्वं नासीदित्यर्थः। एतेन मा यासीत् मा च भूत् तत्र गोत्वमिति परास्तम्॥ ननु सक्रियत्वमङ्गीकृत्यांशेनागमनमस्त्वत आह

न चांशवदिति। (कै)

निरवयवत्वेनांशाभावादित्यर्थः॥ ननु पूर्वमाधारं त्यक्त्वैवायातीत्यत आह

जहातीति। (कै)

पूर्वत्रापि प्रतीतेरिति भावः॥ तस्मात् सर्वगौकेति वाच्यम्। ततश्च कयाचिद्व्यक्त्यैव व्यक्ता सा अभेदात् सर्वगेति वाच्यम्। ततश्च सर्वत्र दृश्येत तदाह

सर्वेष्विति। (कै)

अत्र पक्षे गोभूतमभिव्यक्तगोत्वेन व्याप्तं तुल्यव्यक्तित्वेन जात्यन्तरावकाशरहितं सर्वं स्यादिति भाष्यार्थः। जातिसंकरप्रसङ्गश्च इत्यपि बोध्यम्॥

द्रव्यमभिधीयत इति॥ तथा च लिङ्गवचनसिद्धिः। वा॥ एवं च कृत्वा लिङ्गवचनानि सिद्धानि भवन्ति। ब्राह्मणी ब्राह्मणाः ब्राह्मणौ ब्राह्मणा इति।

यद्वाश्रयापाये चाश्रितस्याप्यपायः अवयवापाये अवयविन इवेति जातेर्विनाशप्रसङ्ग इत्यर्थः॥ गोर्जात इति। भा। जातेन गोपिण्डेन गोत्वमभिव्यक्तं तच्च सर्वाश्रयवर्त्तीति एकगोपिण्डप्रत्यक्षत्वे सर्वगोपिण्डप्रत्यक्षत्वप्रसङ्गः॥

कश्चिच्छब्दः एकस्मिन्नेव लिङ्गेशक्तः कश्चित्तु द्वयोः कश्चित् त्रिष्विति लिङ्गानुशासनादिभ्यो निर्णेयम्। कुमारब्राह्मणादिशब्दास्तु लौकिकपुंस्त्व-

जातेनेति । (कै)

व्यासज्यसर्वाश्रयवृत्तिगोत्वं सर्वाश्रयज्ञानैरभिव्यक्तव्यम् अन्यथा गोत्वज्ञानमेव न स्यादित्यर्थः ॥ अस्तु तर्हि तत्प्रत्यक्षत्वाय तदाश्रयसर्वस्य प्रत्यक्षत्वमत आह भाष्ये

अनवकाशमिति । (भा)

अर्थान्तरप्रत्ययावकाशरहितं गोभूतं गोत्वप्रत्यक्षाय गोरूपं वस्तु सर्वं प्रत्यक्षं स्यात् । गोव्यक्तीनामनन्तत्वादनवकाशत्वमित्यर्थः । न विद्यते अवकाशो यस्मादिति बहुव्रीहिरिति तात्पर्य्यम् । अत्र पक्षेऽध्याहारक्लेशात् पक्षान्तरमाह

अथवेति ॥ (कै)

नायातीति । (कै)

उत्पन्नगवि व्यक्त्यन्तरादायातीति न शक्यं वक्तुम् । तस्या निःक्रियत्वात् ॥ "न याती"ति पाठे उत्पन्नव्यक्तिं व्यक्त्यन्तरादागत्य प्राप्नोतीत्यर्थः ॥

न च तत्रासीत इति । (कै)

प्रागाश्रयाभावादित्यर्थः ॥ तत्रैव हेतुमाह

कः पुनरेतयोर्जाति चोदनयोर्विशेषः । एकानिर्वृत्तेनापरानिर्वर्त्त्येन ॥ द्रव्याभिधानं व्याडिः । वा ॥ द्रव्याभिधानं व्याडिराचार्य्यो न्याय्यं मन्यते ।

स्यापि साधनात् । श्वा मृत इति । भा । अभिव्यञ्जकविनाशे जातेस्तिरोभावात् पिण्डान्तरे श्वेति प्रत्ययो न स्यात् । शतप्रत्यय इवैकापाय इत्यर्थः ।

प्रसङ्गाच्च किन्तु पारिभाषिकमेव लिङ्गत्रयम् । तच्च केवलान्वयि । अयमर्थः, इयं व्यक्तिः, इदं वस्तु, इति शब्दानां सर्वत्राप्रतिबद्धप्रसरत्वात् । तत्र

न चैकमिति॥ (कै)

विपर्य्ययस्यापीति। (कै)

सत्प्रतिपक्षसंभवादित्यर्थः। एवं चानेकद्रव्यगतिकाजातिरभ्युपगन्तुमेव न शक्यते इति भावः॥ ननु जातेर्नित्यत्वात् कथं नाशादि किञ्चैकनाशेऽपि व्यक्त्यन्तरेणाभिव्यक्तजात्याश्चाप्रचरेदेवेत्यत आह

अभिव्यंजकेति। (कै)

व्यासज्यवृत्तिर्जातिः सर्वव्यक्तिभिः सम्भूयाभिव्यज्यत इति मते इदं दूषणम्। जातेर्नाशश्च तिरोभाव एवेत्यर्थः। एवं "श्वा नामलोके न [१]संचरे"दिति भाष्यस्य व्यक्त्यन्तरे स्वप्रत्ययविषयो न संचरेत्। न स्यादित्यर्थः। एवं विनाशपदं व्यक्तिवृध्यन्त्यपरम्। तथेति परामृष्टमाकृतौ तिरोधानपरमित्ययुक्तमत आह

यद्वेति। (कै)

आविद्यको धर्मविशेषो जातिरिति भावः॥

---

१ "प्रचरेत्" इत्यपि पाठः॥ "संचरेद्" इत्यनेन नागेशभट्टीयभाष्यपुस्तके एवंविधपाठोऽस्तीत्यनुमीयते॥

अष्टाकपलं निर्वपेत्। एकं निरूप्य द्वितीयस्तृतीयश्च निरूप्यते। यदि च द्वयं पदार्थः स्यादेकं निरूप्य द्वितीयस्य तृतीयस्य च निर्वपणं न प्रकल्पेत॥

भवति। तस्माद्द्रव्यमेव शब्देनोच्यते इति न्याय्यम्॥ न चैकमिति। भा। न हेतुरहितेनादित्यदृष्टान्तेन साध्यसिद्धिर्भवति देवदत्तदृष्टान्तेन विपर्य्यय-

---

तावन्न व्याकरणे आश्रीयते। दारान् इत्यादौ नत्वाभावप्रसङ्गात्। तटस्तटीतटमित्यादौ यथायथं लिङ्गात् त्रितयनिबन्धनकार्य्याणामसिद्धि

न तावद्द्रव्येषु व्यासज्यवृत्तिः। एकाश्रयनाशेऽप्रतीत्यापत्तेः। किञ्च "गामालभेत" इत्यादि चोदनासु सर्वद्रव्यालंभापत्तिः। प्रत्येकसमाप्तौ तु द्रव्यान्तरे तदनापत्तिः। तत्रापि सत्त्वे "एकाकृतिरि"ति प्रतिज्ञाहानिरित्यर्थः। तत्तत्संस्थानाद्युपलक्षितमधिष्ठानचैतन्यमेव द्रव्यमिति नानन्यव्यभिचाराविति तात्पर्य्यम् ॥ भाष्ये

चोदनास्विति। (भा)

प्रवर्त्तकवाक्ये तस्य द्रव्यस्यारम्भणात्। इदमुपलक्षणमारम्भणालम्भनादिकरणादित्यर्थः। तत्रारम्भणं क्रयो बन्धनं वा। जातिवादे दूषणमाह भाष्ये

आकृतौ चोदितायामिति। (भा)

कार्य्यसम्बन्धित्वेन चोदितायामित्यर्थः॥

[१]तच्छेषपूरणेन व्याचष्टे

अयुक्तम् (कै)

इत्यादिना॥ तत्रैव दूषणान्तरं

---

१ कर्म। क॥

तर्हि द्विवचनबहुवचनानि साध्यानि॥ चोदनायां चैकस्योपाधिवृत्तेः। वा॥ चोदनायां चैकस्योपाधिवृत्तेर्मन्यामहे आकृतिरभिधीयत इति। आग्नेयम्

मिति। भा। आकृतिवादिपक्षे शब्देनाकृतिश्चोद्यते द्रव्ये तु कार्य्यं प्रवर्त्तते। अयुक्तं चैतत्। न ह्यन्यचोदनेऽन्यस्य कार्य्ये क्रियमाणे यथोक्तं कृतं

इति अद्दमद्दाशीत्याद्यूह्यम्। नन्वचेतनानां देवतानां कथं पुंनपुंसकादिव्यवस्थेति चेत्। उच्यते। लोकप्रसिद्धमवयवसंस्थानविशेषात्मकलिङ्गं

प्रवृत्तिरिति । (कै)

पुनः पुनः वृत्तिरित्यर्थः ॥

उत्पाद्यत इति । (कै)

उत्पाद्यत्वेन बोध्यत इत्यर्थः ॥ ननु प्रभेदेऽपि द्वितीयोपन्यासे किं बीजमत आह

तत्रेति ॥ (कै)

[1]रूपसामान्याद्वासिद्धमिति "अ इ उण्" (शिवसू-१) इति सूत्रस्थभाष्यरीत्या निष्पन्नेदमभिधेयं नेदमिति विवेकाग्रहादित्यर्थः ॥ ननु तत्राप्युक्तरीत्यैव प्रवृत्तिः स्यादत आह

सादृश्येति । (कै)

तस्य संबन्धिकत्वेन प्रतियोग्यन्तरानुपस्थितेरिति भावः ॥ ननु व्यक्तिशक्तौ आनन्त्यव्यभिचारयोः सत्वात् जातौ शक्तिरित्याशङ्क्य जातिरेव नास्तीत्याह

वृत्तिविकल्पेति । (कै)

१ रूपसामान्याद्वा । वा । रूपसामान्याद्वा सिद्धमेतत् । शिवसू-१ ॥

प्रत्येकं च परिसमाप्यते यथादित्यः । ननु च यस्यापि द्रव्यं पदार्थस्तस्याप्यनवयवेन चोद्यते प्रत्येकं च परिसमाप्यते । एकशेषस्त्वया वक्तव्यः । त्वयापि

जातिः ॥ द्रव्याभिधानमिति । भा । जातेर्वृत्तिविकल्पात्क्षमत्वेनाभावं मन्यमानो व्याडिर्द्रव्यमेव शब्देनाभिधीयते इति मन्यते ॥ आकृतौ चोदिताया-

दाद्युदात्तः । उभयोः सहविवक्षायान्तु आद्युदात्तस्य शेषः । इन्द्रियवाचिना क्लीबेन सहविवक्षायान्तु ॥ "नपुंसकमनपुंसकेन" (१ । २ । ६९)

शब्देनाभिधाने इति। (कै)

प्राधान्येनेत्यर्थः॥ नन्वेवं चोदनायां चैकस्येति चोऽनुपपन्न इत्यत आह

वाक्यकार इति॥ (कै)

प्रयोजनानि। (कै)

प्रयोजनान्तराणि॥

समुच्चयेनेति। (कै)

द्रव्याभिधाने ह्याकृत्यसंप्रत्यय इत्यनेन समुच्चय इति बोध्यम्॥ एकस्याग्नेयादेर्य उपाधिरष्टाकपालत्वादिस्तस्य पुनः पुनः प्रवृत्तेरिति वार्त्तिकार्थः। [1]समासवाच्यत्वात् एकस्येति व्याचष्टे

सामान्यस्य (कै)

इत्यादि॥

अष्टाकपालत्वादि (कै)

इत्यादिपदेन निर्वाहः॥ अत एव भाष्ये स एव दर्शित "एकं निरूप्य" इत्यादिना॥

---

१ समासश्चेष्टत्वात्। इ॥

एकाकृतिरिति च प्रतिज्ञा हीयते। यच्चास्य पक्षस्योपादाने प्रयोजनमेकशेषो न वक्तव्य इति स चेदानीं वक्तव्यो भवति। एवं तर्ह्यनवयवेन चोद्यते

पाद्यते न तु चोदनायाः पूर्वं निष्पन्न इत्यर्थः। तत्र निर्वृत्ते भेदाग्रहणात् द्रव्यान्तरेऽपि प्रवृत्तिः स्यान्न तु निर्वर्त्ये सादृश्याग्रहणादित्यवश्याश्रयणीया

इति सूक्ते अक्षकितवनिन्दाप्रस्ताव अक्षस्याहमेकपरस्य इत्यादयाद्ये शब्दा बहवोऽन्तोदात्ता एव प्रयुज्यन्ते। तस्य नाक्ष इत्यादौ तु रथावयवपरत्वा-

अनवयवेनेति। (भा)

जात्याश्रयाव्यक्तिविशेषा अवयवा इत्युच्यन्ते। अनवयवेन व्यक्तिविशेषानालम्बनेनेत्यर्थः॥ नन्वाश्रयभेदात्तद्भेदोऽत आह

सर्वाभिरिति। (कै)

भेदकाभावान्न भेद इति भावः। प्रत्यक्षविरोधाद् धर्मिग्राहकमानविरोधाच्च भेदानुमानमसंगतमिति भावः॥ ननु आदित्यस्य प्रत्येकं समासमाप्त्यभावेन दृष्टान्तासंगतिं मत्वाह

प्रतिदेशमिति॥ (कै)

अनभिधेयाया इति। (कै)

शक्यतावच्छेदकमशक्यमेवेत्यर्थः। यद्वा प्राधान्येनानभिधेयाया इत्यर्थः॥

परित्यक्तभेदमिति। (कै)

परित्यक्तावान्तरभेदमित्यर्थः॥ ननु द्रव्यस्य प्रत्येकं समाप्तेः प्रकृतेरनुपयोगोऽत आह

शास्त्रमिति॥ (कै)

कर्मणि फलानवाप्तिः॥ ननु च यस्याप्याकृतिः पदार्थस्तस्यापि यद्यनवयवेन चोद्यते न चानुबध्यते विगुणं कर्म भवति विगुणे च कर्मणि फलानवाप्तिः।

चानयोरित्यर्थः॥ एकानिर्वृत्तेनेति। भा। निष्पन्नो हि पशुर्यागसाधनायोपादीयते॥ अपरानिर्वर्त्त्येनेति। भा। आग्नेयोऽष्टाकपालश्चोदनयैवोत्-

---

आद्युदात्तः। देवनाचे तु "फिष" (फिट्सू–१–पा१) इत्यन्तोदात्तः। शकटावयवविभीतकयोस्तु घञन्तत्वादाद्युदात्तः। अत एव "प्राचेयाम्"

अपरो शास्त्रोक्तमिति। (भा

एकः शब्दः [१]निवेशित्वादेकं द्रव्यं गोरूपं बोधयेत् तस्य केन-चिदालम्भे कृते परैस्तेन वा गवान्तरालम्भेऽशास्त्रार्थः प्रत्यर्थः स्यात्। एवं न ब्राह्मणमित्यादावपि एकस्य ब्राह्मणस्यावधो विषयस्तत्रान्यविषये सर्वेषां कामचारेण प्रवृत्तावपि न प्रायश्चित्तं स्यादिति बोध्यम्। सर्वपुरुषान् प्रति एकव्यक्तेरेव बोधनमित्यभिमानः॥

अथानुष्ठानेति। (कै)

अयं भावः। जातेः साक्षादनुबन्धनाद्यसंभवात् व्यक्तिद्वारा तद्वाच्यं तच्चानुष्ठानमिष्यर्थमेकप्रयोगे एकव्यक्तिद्वारकमेव तदाश्रीयते तच्चाकृतेरेकत्वे विनिगमनाविरहात् सर्वव्यक्तिद्वारकमेव तदाश्रीयते आकृतेरनेकत्वे तु प्रतिज्ञाहानिरिति॥ पूर्वारूप्यस्याव-तारणाच्चशब्दोऽनुपपन्नोऽत आह

तु शब्दस्यार्थे इति॥ (कै)

भाष्ये

---

१ "निवेशित्वात्" इत्यारभ्य "शास्त्रार्थः" इत्यन्तं नास्ति क पुस्तके॥

दोषः। गौरनुबन्ध्योऽजोऽग्नीषोमीय इति। एकः शास्त्रोक्तं कुर्वीतापरो-ऽशास्त्रोक्तम्। अशास्त्रोक्ते च क्रियमाणे विगुणं कर्म भवति विगुणे च

एकेनैव यजमानेन सकृदेवाष्टाकपालः पुराडाशो निरूप्यते नान्येन नाप्य-न्यदेत्यर्थः॥ कः पुनरिति। भा। गौरनुबन्ध्य इत्याग्नेयमष्टाकपालमिति

सहविवक्षायामाद्युदात्तः शिष्यते नित्स्वरस्य परत्वात्। अक्षौ अक्षाः। "अक्षस्यादेवनस्य" (फिटसू-३५-पा २) ति फिटसूत्रेण शकटाक्षे

एकस्यापीति। (कै)

एकस्यापि अनेक इति पाठः। एकस्यापीन्द्रशब्दस्य यथानेकयागाङ्गत्वेन विषय एकबोधज्ञानविषयश्च एकदेशावच्छिन्नानेकयागेषु तथा दर्शनसंभवात् तथा एकस्य अपि जातेरनेको विषय आश्रयतयेत्यर्थः॥ अनेकस्य इति पाठे एकेऽपि यथा इन्द्रशब्दोऽनेकयागस्य एकस्यापि बोद्धुर्विषयस्तथा जातिरपीत्यर्थः॥

अव्ययीभावे इति। (कै)

इन्द्रस्य प्रादुर्भाव इत्यर्थः॥

सर्वेष्विति। (कै)

प्रादुर्भावविषयेन्द्रशब्दरूपा तद्बोध्या वा एका देवता व्रीह्यादिद्रव्यवत्सर्वयागेष्वङ्गतां युगपत् प्रतिपद्यत इत्यर्थः॥ भाष्येऽपि इन्द्रशब्द "आहूतः" प्रादुर्भूतः "युगपत् सर्वत्राङ्गं" भवतीत्यर्थः॥

यदीति। (कै)

अनेकाधिकरणस्थपदेनानेकसम्बन्धो विवक्षित इत्यर्थः। एवं चैकः शब्दो यथानेकत्रार्थे एकेन युगपत् गृह्यते तथा जातिरपीत्यर्थः॥

संप्रत्ययः। वा॥ द्रव्याभिधाने सत्याकृतेरसंप्रत्ययः स्यात्॥ तत्र को दोषः। तत्रासर्वद्रव्यगतिः। वा॥ तत्रासर्वद्रव्यगतिः प्राप्नोति। असर्वद्रव्यगतौ को

एतदुक्तं भवति। यदि आग्नेयादिशब्देन सामान्यमभिधीयते तदा तेनाशेषद्रव्याणामाक्षेपात् प्रतिद्रव्यमष्टाकपालत्वमुपाधिर्युज्यते। द्रव्ये तु पदार्थे

मध्योदात्तः। मीमांसामधीते मीमांसकः। "क्रमादिभ्यो वुन्" (४। २। ६१) नित्स्वरेणाद्युदात्तः। उभयोः सहविवक्षायामाद्युदात्तः। उभयोः

अविगीतः। (कै)

प्रमाणभावः। प्रमाणत्वं यस्य स्मृतस्य स्मरणस्य पदार्थविषयकस्य तेनोपनिबद्धानि वचनानि यैस्तेषामित्यर्थः॥ द्रव्यस्य शब्दार्थत्वे हि एकब्राह्मणवधनिषेधादेव प्रतीयेत॥

एकः क इति।

एवं चेत् यो यस्य तद्वाक्यश्रवणकाले बुद्धिस्थः स इति गृह्याण। जातेः पदार्थत्वे तु न दोष इति तात्पर्य्यम्॥

अन्यच्च कामचार इति। (भा)

सर्वेषामिति शेषः। एकेन एकस्याहनने जातः शास्त्रार्थ इति अन्यब्राह्मणविषये सर्वेषां कामचारः स्यादित्यर्थः॥

नन्वेकमिति। (कै)

जातिरूपमित्यर्थः॥

सद्भावे विवादादिति। (कै)

बौद्धादीनामिति शेषः। किं च सामस्त्येन प्रत्यवयवमवयवी-नोपलभ्यत इति वैषम्यादपि स न दृष्टान्तित इति भावः॥ साका-ङ्क्षत्वाद्वाक्यस्याह

तस्य दोषः स्यात्। एकशेषेऽपि नैको वृक्षशब्दोऽनेकमर्थं युगपदभिदधीत॥ अवश्यं चैतदेवं विज्ञेयमाकृतिरभिधीयत इति। द्रव्याभिधाने ह्याकृत्य-

---

समुच्चयेनाचष्टे॥ चोदनायां चैकस्येति। भा। सामान्यस्याग्नेयादेः॥ उपाधिवृत्तेरिति। भा। अष्टाकपालत्वादिरुपाधिः तस्य वृत्तिः प्रवृत्तिः।

(द्वितो–पा–फिट्सू–३३) फिट्सूत्रेण प्रकृतेरनुदात्तत्वात्। तदुक्तं "वर्णा-दनुदात्ताद्" इति। तथा मीमांसते इति मीमांसकः। लित्स्वरेण

प्रत्यक्षशब्देन शाब्दमप्युच्यते॥

तत इति। (कै)

तत्र इत्यर्थः॥

विप्रतिपन्नेति। (कै)

देहात्मप्रत्ययवत्। भ्रान्तत्वशंकयेति भावः। प्रयोगस्तु विमत-प्रत्ययो जातिविषयो देशादिभेदेऽपि अबाधितैकाकारप्रत्ययत्वात् संमतवदिति॥

अवस्थेति। (कै)

अवस्थाकृतभेदोपपादनेन च न व्यक्त्यैक्यं विषय इति सूचितम्॥

प्रत्यभिज्ञाप्रत्ययेति। (कै)

तद्विषयप्रत्ययेत्यर्थः॥

उपबृंहकमिति। (कै)

भ्रान्तत्वाशङ्कानिवर्त्तनेन प्रमात्वनिर्वाहकस्तर्क इत्यर्थः॥

न सादृश्येति। (कै)

सादृश्यरूपैकक्रियाकारितादिनिमित्तकभ्रमरूपा नेत्यर्थः॥

करणस्थं युगपदुपलभ्यत इति॥ नैकमनेकाधिकरणस्थं युगपदिति चेत्तर्ह्येकशेषे शेषे। वा॥ यो हि मन्यते नैकमनेकाधिकरणस्थं युगपदुपलभ्यत इत्येक-

---

निबन्धनानि द्विवचनबहुवचनानि न सिद्ध्यन्तीति भावः। एवं भाष्यकारेण पक्षयोः साम्यं दर्शितम्। वाक्यकारस्तु जातिपक्षाश्रयणस्य प्रयोजनानि

इति ङीषन्तस्यापि उदात्तनिवृत्तिस्वरेणान्तोदात्तता स्यादेवेति चेत्। भ्रान्तोसि। उदात्तनिवृत्तेरेवाभावात्। "वर्णानान्तणतिनितान्तानामि"ति

तथा वनमिति ॥ (कै)

अविशेष इति । (कै)

एकरूपत्वमित्यर्थः ॥ वनशब्देन कदाचिदाम्रसमुदायस्य कदाचित्पलाशसमुदायस्य कदाचित् खदिरसमुदायस्य कदाचिदाम्रादिसमुदायस्य प्रतीतेरिति तात्पर्यं तदाह

भिन्नदृष्टेति ॥ (कै)

एकत्वे युक्त्यन्तरमाह

ज्ञायते चैकेति ॥ (भा)

आद्यव्याख्यानेऽध्याहारभयाद्भाष्यस्वारस्याच्चाह

अथवेति ॥ (कै)

उपदिष्टमिति । (कै)

भावे क्त इत्यर्थः ॥ भाष्ये

कः पुनरिति । (भा)

अनेनापि प्रत्याख्यानविशेषस्यैवोपपादनादिति भावः ॥

प्रत्यक्षमिति । (कै)

एक इन्द्रोऽनेकस्मिन् क्रतुशत आहूतो युगपत् सर्वत्र भवति। एवमाकृतिरपि युगपत् सर्वत्र भविष्यति॥ अवश्यं चैतदेवं विज्ञेयमेकमनेकाधि-

---

येति। भा। जात्युपलक्षितस्य द्रव्यस्य शब्देनाभिधाने सत्यभिधेयानेकत्वेनाऽनेकशब्दत्वप्रसङ्गादित्यर्थः॥ त्वयाऽपीति। भा। जातेरेकत्वाद्द्वित्वबहुत्व-

---

ङीबन्तस्य पित्त्वादनुदात्तप्रत्ययस्य शेषः। न तु जातौ पुंयोगे वा यो ङीष् तदन्तस्य प्रत्ययस्वरेणान्तोदात्तस्य। ननु "वर्णादनुदात्तात्" (४। १। ३९)

दिना सामान्याकृतिरूपादेरेव ग्रहणमिति न दोषः। प्रथमतो बालस्य यद्यपि विशेषव्यक्तावेव शक्तिग्रहस्तथाप्यावापोद्वापन्यायेन व्यक्त्यन्तरे आनयनादिदृष्ट्वा पूर्वज्ञातशक्तिग्रहस्य जात्याश्रयमात्रे व्यवस्थितिरिति तत्त्वम्॥ वाहादिक्रिया तर्हि कथमत आह

द्रव्यद्वारका इति॥ (कै)

आश्रये क इति।

आश्रये करणमेव जातौ तत्करणमिति भावः॥ अन्वयबोधे तु बाधज्ञानस्याप्रतिबन्धकत्वान्न तदनुपपत्तिः। जातीत्यादिप्रयासो वृथेति कश्चित्॥

संनिधिमात्रेण। (कै)

शक्तिग्रहे व्यक्ता उपलक्षणतामात्रेण प्रत्यभिज्ञाप्रत्ययरूपेण प्रत्यभिज्ञाविषयेण प्रत्ययेन तदुच्चारितगोशब्दाद्यादृशः प्रत्ययस्तादृश एवैतदुच्चारितादित्येवं प्रत्यभिज्ञाविषयता सा चैकाकारतां विनानुपपन्नेति। द्वितीयेनाभिधाने सिद्धेऽपि एकत्वं न सिध्यतीत्याह

करणस्थो युगपदुपलभ्यते॥ विषम उपन्यासः। नैको द्रष्टादित्यमनेकाधिकरणस्थं युगपदुपलभते॥ एवं तर्हि। इतीन्द्रवद्विषयः। वा॥ तद्यथा।

च्यते॥ प्रत्येकं च परिसमाप्यते इति। भा। शास्त्रमित्यध्याहारः। अथवा जातिरुपलक्षणभूता प्रत्येकं परिसमाप्यत इति व्याख्येयम्॥ एकशेषस्त्व-

---

सरूपैकशेष एवेत्याशयात्। प्रकृतमनुसरामः। स्वरभिन्नानां यस्योत्तरः स्वरविधिः स शिष्यत इति वक्तव्यम्। तेन पूर्वोदाहृते हरिणाविद्यत्र

गुणेति ॥ (कै)

आलम्बनेनेति। (कै)

विषयेणेत्यर्थः ॥

प्रत्यायित इति। (कै)

अनेकशोऽपीत्यादिः ॥

विशेषानवधारणादिति। (कै)

आश्रयभेदेऽपीत्यादिः ॥ अविच्छेदं व्याचष्टे

अविशेष इति ॥ (कै)

तस्य गतिरिति। (कै)

विशेषानवगतिपूर्वसामान्यस्य शब्दतोऽवगतिरित्यर्थः। अयं भावः। गुणादिभिन्नेष्वनुस्यूतैकाकारप्रतीत्या जातिसिद्धौ तत्र शक्तिग्रहः शब्दात्तस्यावबोधश्च व्यक्तीनां त्वानन्त्यात् तासु न शक्तिग्रहो नापि शुद्धानां तासां बोधस्तासां विशेषरूपत्वेन विशेषावगतिप्रसंगात्। यथाकृतिरूपादिकं शाब्दबोधे भासते सामान्येन तथा विशेषेऽपि भासेत। जातेः शक्यत्वे तु तदाश्रयत्वेनाक्षेपा-

---

मनेकाधिकरणस्थं युगपत्। वा॥ अस्ति खल्वप्येकमनेकाधिकरणस्थं युगपदुपलभ्यते। किम्। आदित्यः। तद्यथा। एक आदित्योऽनेकाधि-

---

जातिरपीत्यर्थः॥ ननु चेति। भा। द्रव्येऽपि पदार्थे जातेरनभिधेयाया उपलक्षणत्वेनाश्रयणात् परित्यक्तभेदं द्रव्यमात्रं विशिष्टजातियुक्तं शब्देनो-

---

लाभार्थं प्रकृत्यर्थान्वयस्य प्राथमिकत्वं स्वीकार्य्यमेवेति वाच्यम्। य य य इत्येषामेकविभक्तिं प्रति प्रकृतित्वाभावेऽपि विभक्तौ परतः सारूप्यसम्भवेन

तत्र [1]शक्यतावच्छेदप्रकारकबोधाङ्गीकारे तदनुगतीकृतानेकव्यक्तिबोधो नाश्य एव एकस्माद्द्रव्यपदार्थवादेऽपि शुद्धव्यक्तिबोध इति वादीनां मतेऽपि प्रवृत्तिनिमित्तोपलक्षितानेकव्यक्तौ शक्तिग्रहात्तात्पर्य्यग्राहकसत्त्वे एकस्मादप्यनेकशुद्धव्यक्तिबोध इति सर्वथा द्रव्यपक्षेऽपि सूत्रं प्रत्याख्यातम्॥ इदमेव तत्र यदेकस्य युगपदनेकार्थबोधकत्वं तदाह

प्रत्याख्यानमिति। (कै)

इदं च प्रत्याख्यानमर्थस्यान्यप्रमाणत्वादित्यनेन सूत्रकृतापि दर्शितप्रायमेव॥ नन्वेवमपि द्वन्द्वो दुर्वारोऽत आह

न त्विति। (कै)

सहविवक्षायामेकजातीयार्थानेकशब्दप्रयोगादर्शनेन तदसाधुत्वप्रतिपादनार्थसूत्रमिति भावः॥

एकाकृतिरिति। (भा)

भाष्यस्यास्तीति शेषः शब्दार्थः। शब्दप्रतीतिविशेष्यः बुद्धिरिति प्रमात्मिकेत्यर्थः॥ ननु व्यक्त्यैक्ये स्यादेव प्रतीत्येकरूपतेत्यत आह

---

१ शक्यतावच्छेदकप्रकारकः। क॥

मपीत्वान्यत्र कामचारः स्यात्॥ कः पुनरस्य विशेषोऽव्यपवर्गगतेश्चेत्यतः। तस्यैवोपोद्बलकमेतत्। अव्यपवर्गगतेश्च धर्मशास्त्रं च तथेति॥ अस्ति चैक-

---

परिसमाप्तत्वादेकस्मिन्नपि द्रव्ये तत्कर्मक्रियमाणं जातौ कृतमेव भवतीत्यर्थः॥ यथादित्य इति। भा। प्रतिदेशं यथा सर्वात्मनादित्य उपलभ्यते तथा

ग्रन्थो नेयः। "केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन्" इत्यादिग्रन्थास्तु मतान्तराभिप्रायेण नेयाः। न चैवमपि विरूपैकशेषपक्षे समानार्थता-

एकेनैवेति। (कै)

युगपदधिकरणवाचक इति रीत्येत्यर्थः ॥

पक्षान्तरेणेति। (कै)

सजातीयत्वाद् झटितिबुद्धिस्थेनेत्यर्थः ॥ भाष्ये

एकेनापीति। (भा)

अपिनानेकेनापि ॥ प्रत्याख्यानवाद्येव युक्त्यन्तरमाह

उभयदर्शनाच्चेति। (भा)

उभयोरप्येकेनानेकार्थाभिधानदर्शनादित्यर्थः ॥ तद्व्याचष्टे

सरूपस्य चेति॥ (कै)

द्विवचनान्तमिति। (कै)

अत एव पदकाले पृथिवी इतीति प्रगृह्यत्वम् ॥ ननु द्यावा इत्यादाविव वृक्षावित्यादावपि जाति अनेकार्थाभिधानं स्यादिति चेन्न स्वभावेन वारणात् ॥

यच्चैकं प्रवृत्तिनिमित्तमिति। (कै)

प्रवृत्तम्। ब्राह्मणो न हन्तव्यः सुरा न पेयेति ब्राह्मणमात्रं न हन्यते सुरामात्रं च न पीयते। यदि द्रव्यं पदार्थः स्यादेकं ब्राह्मणमहत्वैकां सुरा-

---

शेषारम्भः प्रत्याख्यायते अनेकत्वे तु आरब्धव्य एवैकशेष इत्यर्थः॥ एवं तर्हीति। भा। सर्वाभिर्व्यक्तिभिः सम्बन्धस्य तुल्यत्वात् सर्वत्रैवाभिन्नबुद्ध्युत्पादनात् प्रत्येकं

एकप्रत्ययोपात्तदेवतान्वयस्यान्तरङ्गत्वादेवमेवेति चेत् सत्यम्। प्रदेय एव शक्तिः प्रकृतेस्तु प्रत्ययसमभिव्याहारात् देवतायां निरूढलक्षणेत्याशयेनायं

अपिना एतत् सूचयति। नैकेनैकस्याभिधानं वयं निराकुर्मः। किन्तु सहविवक्षायामेकेनानेकाभिधानमपि स्वीकुर्मः। तेन वाक्यसिद्धिः। एकशेषारम्भश्च न कार्य्यः। द्वन्द्वस्य तु प्रयोगादर्शनात्तन्निवृत्त्यर्थोऽपि स इति। स्वीयस्वीयार्थत्याग एव प्रत्यर्थत्वमिति भावः॥ आरम्भवाद्याह

यावतामिति। (भा)

एष एव न्याय्य इत्यर्थः॥ न्याय्यत्वं कुत इत्यत आह

वृक्षश्चेति। (कै)

एकस्य न स्यादिति प्रयोगे इति शेषः॥ प्रत्याख्यानवादी आह

एकेनेति। (भा)

वृक्षावित्यादिदर्शनादिति भावः॥ आरम्भवाद्याह

यदीति॥ (भा)

सहेति। (कै)

समुदायार्थप्रादुर्भावादिति भावः॥ द्विवचनाद्युत्पत्त्यर्थमाह

उद्भूतेति॥ (कै)

प्रख्याविशेषादित्यतः। तस्यैवोपोद्बलकमेतत्। प्रख्याविशेषाज्ज्ञायते चैकोपदिष्टमिति॥ धर्मशास्त्रं च तथा। वा॥ एवं च कृत्वा धर्मशास्त्रं

"एकाकृतिरिति चे"ति। भा। च शब्दस्तु शब्दस्यार्थे वक्ष्यमाणार्थापेक्षया समुच्चये वा॥ स चेदानीमिति। भा। एकत्वजातेरेकशब्दप्रवृत्तेः सिद्धत्वादेक-

---

आग्नेयादावियं स्थितिः" इति पक्षे देवतावतां साहित्यं लभ्यते न तु सहितानां देवतात्वे देवतायां प्रदेये च खण्डशः शक्तिरिष्यत इति पक्षेऽपि

सर्वो ग्रन्थ इति ॥ (कै)

भाष्ये

अथ किमर्थं लोप इति। (भा)

अग्निचिद् इत्यतो लोकत एव कर्त्रर्थे प्रतीतिसिद्धेरिति भावः॥

प्रत्ययलक्षणमिति। (भा)

अनेन [१]लोपेनानुवृत्तेरेवान्वाख्यानमित्युक्तं न प्रत्यर्थमिति ततश्च वृत्त्येति वाक्यं न स्यादिति भावः॥ इतराभिमतमनूद्य दूषयति

प्रत्यर्थम् (भा)

इत्यादि। प्रत्यर्थं शब्दनिवेशादेकेनानेकाभिधानाभावादेकशेष आरब्धव्यः। अन्यथाऽप्रत्यर्थं स्यात्। एकेनानेकस्याभिधाने प्रत्यर्थं शब्दप्रयोगो न स्याद् इति चेदित्यर्थः॥

यदप्येकेनेति। (भा)

---

१ लोपेनानुत्पत्त्येव। क॥

कपोतिकेति॥ ज्ञायते चैकोपदिष्टम्। वा॥ ज्ञायते खल्वप्येकोपदिष्टम्। गौरस्य कदाचिदुपदिष्टो भवति। स तमन्यस्मिन् देशेऽन्यस्मिन् कालेऽन्यस्यां च वयोऽवस्थायां दृष्ट्वा जानात्ययं गौरिति॥ कः पुनरस्य विशेषः

येदित्यर्थः॥ उक्तमेवार्थं समर्थयितुमाह "द्रव्याभिधाने ह्री"ति। भा। श्रुतिस्मृतिविहितानां सर्वव्यवहाराणामप्रवृत्तिः स्यादित्यर्थः। ननु चेति। सर्वविषयाचेदाकृतिश्चोद्यते तदा सर्वव्यक्तिविषयमनुष्ठानं विना वैगुण्यमेव स्यादित्यर्थः। यथानुष्ठानसिद्ध्यर्थमेकद्रव्यविषयमेव कर्मक्रियते तत्राप्युच्यते

तत्कृतं चैकशेषत्वमिति न प्रकृतौ भवेद्" इत्युत्तरवार्त्तिकस्यानुगुण्यात्। स्यादेतत्। "प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम्। अभेदस्येह सम्बन्ध

लोपद्वारेणेति। (कै)

एवं च शिष्यमाणस्य लुप्यमानार्थबोधकत्वमनुभवमितिभावः॥

भाष्ये

बह्वर्थता वा भवतीति। (भा)

वा चार्थे। क्वचित् चेत्येव पाठः। विद्यमानैव बोध्यते इत्यर्थः॥

[1]एतदजानानः शङ्कते

उच्येत तर्हीति॥ (भा)

तद्व्याचष्टे

वचनादिति। (कै)

शास्त्रस्य शास्त्रीयकार्य्यार्थत्वादिति भावः॥

संप्रत्ययः स्यादिति। (भा)

भाष्ये आश्वत्वप्रमाणादित्यर्थः॥ तर्हि शब्दस्य चार्थतया व्याख्याने मानं दर्शयति

---

१ एतदजानान इतरः। इ॥

यद्यपि तावत्संख्याविशेषाज्ज्ञायत एकाकृतिरिति कुतस्त्वेतत् साभिधीयत इति। अव्यपवर्गगतेश्च। वा॥ अव्यपवर्गगतेश्च मन्यामह आकृतिरभिधीयत इति। न हि गौरित्युक्ते व्यपवर्गो गम्यते शुक्ला नीला कपिला

यागेषु द्रव्यवदङ्गतां प्रतिपद्यत इत्यर्थः॥ एकशेषेऽपीति। भा। यद्येकस्यानेकसम्बन्धो नाभ्युपगम्यते। तदैकः शब्दोऽनेकमर्थं सम्बन्धाभावान्न प्रत्याय-

---

द्रष्टव्यम्) इत्यादौ मिलितयोर्देवतायामभेदान्वये यथेत्युदाहृतवार्त्तिकस्योत्तरार्धेऽर्थोऽध्यवसेयः। युक्तं चैतत्। "प्रत्ययार्थबहुत्वं हि प्रत्यक्षमुपलभ्यते।

असमानशब्दत्वादसमानार्थत्वाच्चेत्यर्थः ॥ द्विवचनेत्यादिग्रन्थस्तु वृत्तौ इत्याद्यभिप्रायकः सूत्रं प्रत्याख्यातुं

निवृत्तिप्रसङ्ग इति ॥ (कै)

जातनिवृत्तौ मानाभावात् तत्त्वेऽपि तदर्थाभावेन तदबोधप्रसङ्ग इति [१]वक्तुं

यद्यपीति। (कै)

शब्दार्थसम्बन्धस्य नित्यत्वादिति भावः ॥

विप्रयोगः। (कै)

द्वन्द्वरूपः ॥

एतत् प्रतिपादितमिति। (कै)

भाष्ये "कृतम्" इति [२]एकशेषविधानसामर्थ्यलभ्यप्रतिपादने वर्त्तते तेन शब्दार्थसम्बन्धनित्यत्वेऽपि न क्षतिरिति भावः ॥ लोपस्याभावात्मकत्वात् तत्कृतत्वमर्थावगतेरनुपपन्नमत आह

---

१ वक्तुं युक्तम् ॥ इ ॥ २ एकशेषविधानसामर्थ्याल्लब्धम्। क ॥

कथं पुनर्ज्ञायत एकाकृतिः सा चाभिधीयत इति। प्रख्याविशेषात्। वा ॥ न हि गौरित्युक्ते विशेषः प्रख्यायते शुक्ला नीला कपिला कपोतिकेति ॥

त्वेनोपात्तः ॥ इतीन्द्रवद्विषय इति। भा। एकस्याप्यनेक इति वाक्यशेषः। शब्दप्रादुर्भावेऽव्ययीभावे कृते वतिः प्रत्ययः ॥ सर्वेषेति। भा। सर्वेषु

देवतान्वयादेको यागः। अग्नीषोमीय ("अग्नीषोमीयं पशुमालभेत" "अजोऽग्नीषोमीयः" इत्यादिषष्ठाध्यायस्याष्टमे पादे नवमाधिकरणे

तदास्यदचेतनत्वम् ॥ "आदिना" प्रत्यक्षत्वपरोक्षत्वे ॥

प्रकरणादीति। (कै)

गार्ग्यावित्यत्र "वृद्धो यूनेति"ति भावः ॥

यदात्विति। (कै)

१"त्यदादीनी"त्येकशेषारम्भादिति भावः ॥

आख्यातेनाभिधानमिति। (कै)

प्रथमत इति शेषः। पश्वादित्वादिप्रत्ययः समभिव्याहारादिति भावः। एवं चेदं वचनमवैयाकरणतार्किकस्येति तात्पर्य्यम्। स्वरूप-व्याक्रिययैव चास्य प्रत्याख्यातप्रायत्वाद्द्विवचनाद्यसिद्धेश्च। नास्य विशिष्यप्रत्याख्यानं भाष्ये इति बोध्यम् ॥

असरूपत्वादिति। (भा)

---

१ अ १। पा २ सू ७२ ॥

किल नामैकेनानेकस्याभिधानं स्यात् किं पुनः सरूपाणाम् ॥ आकृत्यभि-धानाद्वैकं विभक्तौ वाजप्यायनः। वा ॥ आकृत्यभिधानाद्वैकं शब्दं विभक्तौ वाजप्यायन आचार्य्यो न्याय्यं मन्यते। एकाकृतिः सा चाभिधीयत इति ॥

काराणामपि तथैव व्यवहारदर्शनादित्यर्थः ॥ नन्वेकमनेकस्थं कथं भवति। न हि देवदत्तो युगपन्मथुरायां स्रुघ्ने च भवतीत्यत आह अस्ति चेति। भा। अवयवी यद्यप्यनेकावयवस्थः तथापि तत्सद्भावे विवादान्नासौ दृष्टान्त-

---

तथा च मिलितानां देवतासम्बन्धं बोधयितुं लौकिकविग्रहे येषामिति निर्देशः। वृत्तौ तु देवतावद्वाचकस्य तद्धितस्यैकशेष इति मिलितेषु पशुषु

अथवा नेमे इति (भा)

भाष्यस्यायमेवार्थः । एकशेषेणाऽप्ययमेवार्थः सूचितमिति (सूचित इति । इ) बोध्यम् ॥ भाष्ये

प्रथमेति । (भा)

[1]प्रथमे नमध्यमः प्रथमादिनोत्तम इति वक्तव्यमित्यर्थः ॥

पुरुषे । (कै)

प्रथमाद्यन्यतमे ॥

एकत्वादिति । (कै)

भेदावगमे हेतोरभावादित्यर्थः ॥

प्रत्यक्तम् । (कै)

अहंकारानास्पदचैतन्यम् ॥

पराक्तम् । (कै)

---

१ प्रथम मध्यमः । इ ॥

पुनः स्वाभाविकम् । वा ॥ स्वाभाविकमभिधानम् ॥ उभयदर्शनाच्च । वा ॥ उभयं खल्वपि दृश्यते । विरूपाणामप्येकेन अनेकस्याभिधानं भवति । तद्यथा । द्यावा ह क्षामा । द्यावा चिदस्मै पृथिवी नमेते इति । विरूपाणां

काराणामप्यविगीतप्रमाणभावस्मृत्युपनिबद्धवचनानां जात्याश्रयेण सर्वव्यवहारप्रवर्त्तनादित्यर्थः ॥ एवं ब्राह्मणमिति । भा ॥ एकस्यैव द्रव्यस्य ब्राह्मणशब्दवाच्यत्वादिति भावः ॥ तस्येति । भा ॥ अव्यपवर्गगतिरभ्रान्ता । स्मृति-

---

ण्यप्रत्ययान्तानामेव वेति तदाशयात् । कृतैकशेषाणां प्रजापतिर्देवता येषामिति कृतैकशेषयच्छब्देनोपस्थापितानां तद्धितसङ्गतिस्तद्धितवाच्यता ।

च्छतीति शब्दस्तथान्योन्यमव्यपेक्षद्वित्वेनैकैकस्मिन्नपि द्विशब्दप्रवृत्तिरिति सिद्धमेकशेषशब्दत्वं द्वौ च द्वौ च इति विग्रहः। द्वित्ववैशिष्ट्येन बोधाच्च। प्रत्येकं द्विवचनं प्रयोगेत्वेकशेषेणैव प्रयोगान्नकदाप्येकबोधो द्वावित्यतः। एवं चैको न द्वावित्याद्युपपन्नम्। द्वौ नैकस्त्रयो न द्वौ इत्येवं विधव्यवहारादुत्तरसङ्ख्यायाः पूर्वसङ्ख्याबाधकत्वमिति तत्त्वम्॥

अथवेति। (कै)

अत्र पक्षे॥

तत्तुल्यमिति। (भा)

स व्यपेक्षास्त्वित्युत्तरं योज्यम्॥

नोद्यच्छतिचान्तरेण (भा)

इत्यत्र स्वसमकक्षं सहायमिति शेषो बोध्यः। वस्तुतो द्व्यादीनामेकशेषशब्दत्वाभावेऽपि नियमत उद्भूतावयवभेदसमुदायविवक्षणेन न कदाचिदपि द्व्यादिभ्य एकवचनम्॥

प्रयुज्यते। कथमनुक्तो यदिदानीमेवोक्तमेकेनाप्यनेकस्याभिधानं भवतीति। सरूपाणामेकेनानेकस्याभिधानं भवति न विरूपाणाम्॥ किं पुनः कारणं सरूपाणामेकेनाप्यनेकस्याभिधानं भवति न पुनर्विरूपाणाम्॥ अभिधानं

इत्यर्थः। अथवा वत्समुद्दीपयत्युपोद्वलकमुपष्टंहकमुच्यते। धर्मशास्त्रं च तथेति। भा॥ अनेनैतद्दर्शयति। न सादृश्यै कार्थक्रियाकारित्वादिनिमित्ता भ्रान्ता प्रत्यभिज्ञा सर्वत्रेति ग्राह्यं किं तर्हि अभिन्नविषयनिमित्तास्मृति-

---

न्तानामेकशेषः कृतो भवेत्। किं वा कृतैकशेषाणां पश्चात् तद्धितसङ्गतिरिति वदतां भट्टानां ग्रन्थोऽपि व्याख्यातः। णप्रत्ययान्तानामेकशेषः।

वार्त्तम् (भा)

इत्यस्यासारमित्यर्थ इत्यन्ये ॥ भाष्ये

यद् (भा)

इत्यस्य यच्चेत्यर्थः। सर्वे परस्परसापेक्षा इत्यर्थः॥ ननूद्यमनस्यैव कर्त्तृत्वप्रतीतौ कारणत्वात्तस्य च प्रत्येकवृत्तित्वादेकैक इत्येव युक्तस्त-(युक्तं। इ) त्राह

कारणमुद्यमनं चेदिति। (भा)

स्वतुल्य द्वितीयसहायं विनाप्युद्यमनं स्यात्। न च तथा दृश्यते तस्मात् परस्परसापेक्षं पृथक् पृथक् कर्त्तृत्वमित्यर्थः। एवं च तत्र यथान्योन्यकृतेनोद्यमनकर्त्तृत्वरूपार्थेन प्रत्येकस्मिन् तेन सहउद्य-

---

नुक्तत्वात् प्लक्षेण न्यग्रोधस्य न्यग्रोधप्रयोगः। वा॥ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेदनुक्तः प्लक्षेण न्यग्रोधार्थ इति कृत्वा न्यग्रोधशब्दः

भा। एकस्मिन्नुपदिष्टं गौरयं त्वया पदा न स्प्रष्टव्य इत्यादि वस्तु। अथ वैक-मुपदिष्टं यस्य तदेकोपदिष्टं सकृदुपदिष्टं गोत्वादिसर्वत्रज्ञायत इत्यर्थः। उपोद्दलकमिति। भा। उद्धृतं वलं प्रत्यक्षं तत्पूर्वकत्वादनुमानस्य उद्दलस्य समीपमनुमानमित्यर्थः। प्रख्याविशेषादित्यनेन प्रत्यक्षं जात्या-लम्बनं प्रमाणमुपन्यस्तम्। ततो विप्रतिपन्नप्रतिपादनायानुमानमिह जाति-सद्भावे ज्ञायते च "एकोपदिष्टमि"त्यनेनोक्तं देशकालावस्थापिण्डान्त-रेष्वबाधितप्रत्यभिज्ञाप्रत्ययोदयान्यथानुपपत्त्या सामान्यसद्भावोऽनुमीयते

इति सूत्रे कैयटः। तेन पौत्रा दौहित्रा इत्यत्र न लुगित्यवधेयम्। एतेन संख्यया कर्मभेद इत्यस्य व्युत्पादनाय प्रवृत्ते पृथक्त्वनिवेशात् संख्यया कर्म-भेदः स्यादित्यधिकरणे सप्तदशप्राजापत्यानित्युदाहृत्य किं त्वयं तद्धिता-

अन्यदिदानीमिति ॥ (भा)

तद्व्याचष्टे

अवश्यमिति। (कै)

एवं चेदृशेविषये वैधर्म्योद्भावनमकिंचित्करमिति भावः ॥ साधर्म्योत्पत्त्यपि उक्तवैधर्म्यं बीजमाह

मातादय इति ॥ (कै)

· **आश्रयसद्भावादिति।** (कै)

सद्भावोऽत्र बुद्धिकृतः। तेन स्रतामातेत्याद्युपपत्तिः ॥

समुदायेति। (कै)

इतरसाहित्यविशिष्टद्रव्यनिवेशिन इत्यर्थः ॥

एकेनोक्तत्वात्तस्यार्थस्यापरस्य प्रयोगेण न भवितव्यम्। किं कारणम्। उक्तार्थानामप्रयोग इति ॥ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्न इति चेद-

---

ण्यादिव्यवहारोऽप्युपपद्यते। अथ प्रख्याविशेषादप्यपवर्गगतस्वेति किमर्थमुभयोरुपादानम्। एकेनापि हेतुनैकत्वाभिधानयोः सिद्धत्वान्नैष दोषः। अनभिधीयमानापि जातिः संनिधिमात्रेण प्रख्याऽविशेषे निमित्तं भवतीति प्रख्याऽविशेषेण प्रत्यभिज्ञाप्रत्ययरूपेणैकत्वमेव प्रतिपादितं नाभिधानम्। तथा वनमिति सर्वविशेषाभ्यन्तरीकरणेनाप्यपवर्गगतावपि प्रख्याया अविशेषो नास्ति भिन्नवृक्षावलम्बनत्वाद्वनमिति प्रत्ययस्य। एकोपदिष्टमिति।

स्यादिति वाच्यम्। "यस्कादिभ्यो गोत्रे" (२। ४। ६३) इत्यतो गोत्र इत्यनुवृत्तेः। यद्यप्यपत्याधिकारादन्यत्र लौकिकं गोत्रं तथापीह ऋषिप्रजन एव गोत्रं विवक्षितमिति "स्त्रीपुंसाभ्यां नञ् स्नञौ" (४। १। ८७)

यथेति॥ (कै)

पुत्रविनाशोऽपीति। (कै)

ननु पुत्रस्य बुद्धिस्थत्वेन तन्नाशेऽपि पितृव्यवहारोऽस्त्येव भाविपुत्रस्य पितेति व्यवहारवत् प्रकृतेऽप्येकस्य बुद्धिस्थत्वे तदपायेऽपि चतुरादिव्यवहार इति। किं वैषम्यं पुत्रस्याबुद्धिस्थत्वे तु तत्सत्त्वेऽपि न पितृव्यवहार इति चेन्न नष्टस्य पितेति व्यवहारवत् नष्टबुद्धिस्थं पदार्थमादायैकस्य विद्यमानत्वे द्वौ स्त इत्यादिव्यवहाराभाव इति वैषम्यमित्याशयात्॥

नास्ति चतुः शब्दस्येति। (कै)

एवं च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति भावः॥ नन्वेवं परिहारे दृष्टान्तदार्ष्टान्तिकभावः क्वापि न स्यादित्याह

ऽपि न्याय्य एव यदप्येकेनानेकास्याभिधानं भवति। यदि तर्ह्येकेनानेकस्याभिधानं भवति। प्लक्षन्यग्रोधौ एकेनोक्तत्वादपरस्य प्रयोगोऽनुपपन्नः।

सामान्यलक्षणेऽर्थे विशेषानवधारणादैक्यसामान्यस्यावसीयत इत्यर्थः। कुतस्त्वेतदिति। भा। भवतु सामान्यमेकं तस्य तु वाहदोहादिकायामर्थक्रियायामयोग्यत्वाद् द्रव्यस्यैव योग्यत्वादभिधानं न्याय्यमिति मत्वा प्रश्नः। अव्यपवर्गगतस्त्वेति। भा। अव्यपवर्गोऽभेदः अभेदः अविच्छेदः अविशेषस्तस्य गतिः प्रतीतिरित्यर्थः। जातौ चाभिधीयमानायां द्रव्यद्वारका वाहदोहादय उपपद्यन्ते जातितद्वतोस्तादभेदोपचाराद् गौः शुक्ल इति सामानाधिकर-

---

प्रतिप्रधानं च गुणावृत्तिः। गार्ग्यशब्दत्रयस्य चैकशेषः। उभयथा यञन्तं यद्बहुषु इति लुक्। न चैवं काश्यपस्य प्रतिकृतिः काश्यपः। ततः प्रतिकृतीनां सहविवक्षायां काश्यपा इत्यत्रापि अजन्तं बहुषु वर्तते इति लुक्

समुदायवाचिन इति॥ (कै)

प्रश्न इति। (कै)

एकश्चैकश्चेति विग्रहे शिष्यमाणद्विशब्देन किं सादृश्यमित्यर्थः॥

परस्परेति। (कै)

एकशब्दयोः सहविवक्षायां शिष्यमाणैकशब्दस्यैतदर्थाभिधानासामर्थ्यात्परस्परापेक्षयैकैकत्रार्थे द्वित्वोत्पत्तौ तदभिधानसमर्थशब्दप्रवृत्तिः। तदलौकिकं च द्वौ च द्वौ चेत्यादीति भावः। अन्योऽन्यापेक्षाकृतद्वित्वेन प्रत्येकं द्विशब्दप्रवृत्त्या सारूप्यमिति भाष्याक्षरार्थः। अत एवाग्रे अन्योन्यकृतभावविषय एव प्रश्नः। अन्योन्यकृत इत्यस्य परस्परकृत इत्यर्थः॥ भावः प्रवृत्तिनिमित्तं मातृपुत्रादिशब्दाश्च परस्परकृतमातृत्वपुत्रत्वादिनिबन्धनाः। तदाह

यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेकेनाप्यनेकस्याभिधानम्। भा॥ यावतामभिधानं तावतां प्रयोगो न्याय्य इति चेदेवमुच्यते। एषो-

---

एकत्वादनेकशब्दप्रयोगप्रसङ्ग एव नास्ति किमेकशेषेणेत्यर्थः। कथं पुनरिति। भा द्रव्यातिरेकेणाकृतेरनुपलम्भादभावं मन्यमानस्य प्रश्नः। प्रख्याविशेषादिति। भा। प्रख्याबुद्धिः तस्या अविशेषादेकरूपत्वात् तद्विषयस्याप्यैक्यं प्रतीयते। गुणप्रमाणादिभिन्नेष्वपि गोपिण्डेषु गौर्गौरित्येकाकारप्रत्ययोदयादवश्यमेकेनालम्बनेन सामान्येन भाव्यमिति जातिसद्भाव एकत्वं चावसीयते। गौरित्युक्त इति। भा। गौरित्येतेन शब्देनोक्ते प्रत्यायिते

शेषः। न च पक्षे यशब्दमात्रस्यापि तदापत्तिः। विकल्पस्याष्टदोषदुष्टत्वात्। न च विनिगमकाभावः। अणुरपीति न्यायेन स्पष्टप्रतिपत्तिसामर्थ्यस्यैव विनिगमकत्वात्। यद्वा। यत्र इत्यपि व्यक्त्यैक्यं विवक्षितम्।

निश्चयात्मकप्रतीत्यभावोऽसम्प्रत्यय इत्यर्थः। न चोच्यते वृद्धयुवानावित्यनेन सन्देहबीजं दर्शितम् एवं तर्हि नेमावित्यादि भाष्यस्य वाचकशब्दान्तरसत्ताविशिष्टार्थासम्प्रत्ययेनैकादि शब्दानामेकशेषाभाव इत्यत्र तात्पर्य्यम्। विंशत्यादीनां तु भवत्येवेति दिक् ॥ इदानीं तद्वयस्थमभिप्रेतं द्विशब्दादिरूपदृष्टान्तं खण्डयति

अथवा नेम इति। (भा)

द्वावित्यादय इत्यर्थः। तेषामेकशेषशब्दत्वे हि तद्दृष्टान्तेनात्रैकशेषापादानं नत्वेते तथेति भावः ॥

यदात्विति। (कै)

एकशेषं विनैवेत्यर्थः॥ ननु समुदायो नामार्थः। न च तस्यार्थोऽस्तीत्यत आह

प्रति तदपि प्रत्यर्थमेव॥ यावतामभिधानं तावतां प्रयोगो न्याय्यः। यावतामर्थानामभिधानं भवति तावतां शब्दानां प्रयोग इत्येष पक्षो न्याय्यः॥

स्थयोरभिधानम्। विरूपाणामिति। भा। प्रकरणादिवशाद्यत्रार्थविशेषावसायस्तत्र प्रवृत्तिनिमित्तभेदेऽपि विरूपोऽनेकार्थाभिधायी दृश्यते तत्र सरूपः कथं न स्याद्यत्रैकं प्रवृत्तिनिमित्तमित्यर्थः। तदेवं द्रव्याभिधानपक्षेऽपि प्रत्याख्यायत एकशेषः। अनेकार्थप्रक्रमे अनेकार्थ एक एव वृत्तशब्दः प्रयुज्यते न तु द्वन्द्वः। अनभिधानात्। इदानीमाकृतिपक्षाश्रयेण प्रत्याख्यानं करोति। आकृत्यभिधानादिति। भा। जातिः पदार्थः तस्या

सिञ्चतीत्यादौ नानैकत्वाभिधानार्थं विभक्तिपरम्परा नेति दिक्। गर्गावित्यादावपि पितुरेकत्वात् प्रकृतिरेका प्रत्ययास्तु बहवः। सर्वेषां प्रकृत्यर्थान्विताभिधायितया विरूपाणामपि समानार्थानामिति गर्गयशब्दस्य

द्वन्द्वोऽपीति। (कै)

सङ्ख्याशब्देष्वेकादिषु एकशेषमापादयतोऽयं भावः॥ द्विचतुःशब्दादिभ्योऽनेकार्थाभिधानं घटादिशब्देभ्य इव न स्यादिति। अवश्यमेकशेषेणानेकार्थत्वं वक्तव्यमिति एकादिशब्दानामपि तत्प्रसङ्ग इति॥ भाष्ये

अर्थो गम्यत इति। (भा)

द्वित्वरूपार्थ इत्यर्थः॥

[1]द्वावित्यर्थ इति॥

तस्य च द्वौ शब्दौ वाचक इति भावः॥

सन्देहादिति। (कै)

---

१ स्त इति। क॥

धानादप्रत्यर्थमिति चेदेवमुच्यते। यद्प्येकेनानेकस्याभिधानं भवति तदपि प्रत्यर्थमेव। यदपि ह्यर्थावर्थौ प्रति तदपि प्रत्यर्थमेव। यदपि ह्यर्थानर्थान्

पादनात् द्वितीयस्य प्रयोगो न प्राप्नोतीत्यर्थः। अनुक्तत्वादिति। भा। प्लक्षावित्युक्ते प्लक्षस्य प्लक्षान्तरेण सहत्वं गम्यते न तु न्यग्रोधेनेत्यर्थः। द्यावेति। भा। द्योशब्देन द्यावापृथिव्योरभिधानात् ततः परस्यौकारस्य "सुपां सुलुग्" (७।१।३९) इत्याकारः "गोतो णित्" (७।१।९०) इत्योकारान्तग्रहणाण्णित्वाद् वृद्धिरावादेशश्च। पृथिवी इति। भा। द्विवचनान्तं "वा छन्दसी"ति (६।१।१०६) पूर्वसवर्णदीर्घः। पृथिवीशब्देनात्र दिव-

---

"लस्य" (३। ४। ७७) इत्यत्रजातिविवक्षया लद्वयस्य तसादयः बहूनान्तु झियादय इति सुवचत्वात्। वस्तुतस्तु "वर्त्तमाने लट्" (३। २। १२३) इत्यादौ व्यक्तिनिष्ठैकत्वस्य विवक्षणान्न कश्चिद्दोषः। अत एव वृत्तं वृत्तं

गर्गयशब्दस्य शेष इति तस्यैव लुप्यमानार्थाभिधायित्वमित्यत्रापि पक्षेऽनन्तवद् बहुष्वित्यर्थेनैव लुगितिकेचित् ॥

अव्ययिकेति। (कै)

मन्दबुध्यनुग्रहाय तु कार्य्यमेव वार्त्तिकं सूत्रजालवत् ॥ ननु बहुव्रीहौ निष्ठान्तत्वाद्भिन्नस्य पूर्वनिपातः स्यादत आह

स्वरेणेति। (कै)

साधनं कृतेति समासः ॥

घञन्तत्वादिति। (कै)

अनुव्याप्ताविति‍भ्वादिप्रकृतिकेत्यादिः ॥ अनभिधानस्यावश्याश्रयणीयतां दर्शयति

शब्दनिवेशः कृतः स्यात् ॥ प्रत्यर्थं शब्दनिवेशादेकेनानेकस्याभिधानादप्रत्यर्थमिति चेत्तदपि प्रत्यर्थमेव। वा ॥ प्रत्यर्थं शब्दनिवेशादेकेनानेकस्याभि-

---

मित्यर्थः। उच्यते तर्हि अतः प्रभृति सर्वो ग्रन्थ एकशेषप्रत्याख्यानवादिनः। तदपि प्रत्यर्थमेवेति। भा। अर्थो ह्यभिधेयमुच्यते यश्च ह्यर्थः शब्दो नासौ ह्यर्थतां जहाति बह्वर्थस्य बह्वर्थतां रोदसी दारा इति यथेत्यर्थः। यावतामिति। भा। वृक्षश्च वृक्षश्चेति दर्शनादनारब्धे एकशेषे अनेकार्थता एकस्य न स्यात्। एकेनापीति। भा। सहविवक्षायामेक एव शब्द उद्भूतावयवभेदं समुदायमभिधत्त इत्यर्थः। प्लक्षन्यग्रोधाविति। भा। अत्रापि सहविवक्षायां समुदायार्थप्रादुर्भावादनेकेनैव समुदायस्य प्रति-

---

पचतीत्यादौ तु धातोर्द्वन्द्वादिप्रसक्तिरेव नास्ति यद्वाक्यशेषो मृग्यते। न च मिलिताल्लडादिप्रसङ्गः। धातोरित्येकत्वस्य विवक्षितत्वात्। न चैकस्मादेव कर्तृद्वये लड्द्वयं कर्तृबहुत्वे लकारबहुत्वं च स्यादिति वाच्यम्। इष्टापत्तेः॥

समानार्थत्वमिति। (कै)

नन्वेवं कदाचिद्यशब्दमात्रस्य शेषप्रसङ्गः। तथा सति प्रकृत्यर्थविशिष्टप्रत्ययार्थानवगतिप्रसङ्गात्। न चानड्वाहावित्यादौ अप्यत्र पक्षेऽनेनैवैकशेषसिद्धिः। अपरः सरूपाणामित्यस्य स्थाने समानार्थानामितिमत्वाऽव्याप्तिमाह भाष्ये

यदीति॥ (भा)

नानार्थानामपीति। (भा)

सूत्रमपि क्रियत इति भावः॥

तेनैवान्यो बहुष्विति। (कै)

"तेनैव (तेनैक। द) विरूपाणामपी"ति वचनेन वस्तुतः तेन

पुनरस्य न किंचित्प्रयोजनमस्ति॥ ननु चोक्तं प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानमिति। यदि चैकेन शब्देनानेकस्यार्थस्याभिधानं स्यात् न प्रत्यर्थं

अनेकशब्दाप्रसङ्गादनर्थक एकशेषः स्यात् इत्यर्थः॥ इतर एतत्सामर्थ्यमजानन्नाह कथमिति। भा॥ तच्चैकशेषकृतमिति। भा। एकशेषविधानेनैतत्प्रतिपादितमित्यर्थः। अनेनेति। भा। एकशेषविधानेन। उच्येत इति। भा। वचनादनेकार्थकार्याणि प्रवर्त्तन्तां यथा "जात्याख्यायामेकस्मिन्" इति। न त्वेकार्थः शब्दः एकशेषविधानेनानेकार्थः सम्पद्यत इत्यर्थः। गामश्व इति। भा। अश्वधर्मसमारोपः केवलं प्रतीयते न तु तात्त्विकमश्वत्वमित्यर्थः। यदि तर्हीति। भा। यदि च लोकः प्रमाण-

---

भाष्यम्। सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा चेति। तच्च तत्रैव स्फुटीकरिष्यामः। तस्मात् प्रागुक्त षट्पक्षीमध्येऽनैमित्तिकत्वपक्ष एव प्रबलः। इतरे पक्षापि हेया इति तदभिप्रायकतयैव सूत्रं व्याख्यातम्।

अपत्यवाचीति । (कै)

यद्यपि प्रकृतिनिवृत्ते (प्रकृतिवृत्त्येतत् । द्र) तत् गोत्रमेव नेति

लौकिकस्येति (भा)

विशेषणं व्यर्थं तथापि सिद्धान्तस्वरूपप्रदर्शनमेतत् । यद्वा तत् सदृशत्वात् तत्रापि गोत्रत्वाभिमानः । प्रवराध्यायप्रसिद्धं हि तत्र गोत्रशब्देन गृहीतमित्युत्तरम् ॥

सम्बन्धसम्भवादिति । (कै)

प्रधानानुरोधेन गुणावृत्तिन्यायस्तु यत्र गुणावृत्तिं विना प्रधानोत्पत्तेर्न निर्वाहस्तव्यत्तव्यानीयरादौ तद्विषय इति भावः ॥ इह तु यत्रा (यज्ञा । द्र) कृतेरेकत्वाद्बहूनामपि परत्वसम्भवाद् गुणावृत्तिर्नोपेक्ष्येति तात्पर्य्यम् ॥

ऽवश्यं शब्देषु प्रमाणं किमर्थमेकशेष आरभ्यते । अथ किमर्थं लोप आरभ्यते । प्रत्ययलक्षणमाचार्यः प्रार्थयमाणो लोपमारभत एकशेषारम्भे

माणोऽनेकार्थः किमेकशेषेण । वाचनिकी वेति । भा । यद्यपि सर्वमेव स्वाभाविकं तथापि यत्र प्रयोगविप्रयोगौ दृश्येते तत्र विप्रयोगनिवारणाय यदुच्यते तद्वाचनिकमभिधीयते । स च ह्यर्थ इति । भा । सरूपाणामेकशेषोऽनेकार्थस्य एकविभक्ताविति वक्तव्यमित्यर्थः । सिद्धमिति । भा । एकशेषारम्भसामर्थ्यादयमर्थो गम्यते शिष्यमाणः शब्दोऽनेकार्थाभिधायीति । एकेन ह्यनेकार्थाभिधानायैकशेषः क्रियते । एकार्थाभिधाने तु

अ इति स्थिते "अन्तरङ्गानपि विधीन् बहिरङ्गोऽपी"ति लुकि कृते लुका लुप्ते प्रत्ययलक्षणविरहादेकशेषो न स्यात् तथा युगपदधिकरणवचनतापक्षोऽपि दुर्बलः । जहत् स्वार्थायां वृत्तौ तदयोगात् । तथा च द्वितीये

तदा गर्ग येति। (कै)

प्रत्येकं तद्धितान्तत्वात् सह विवक्षायां प्रत्येकं बहुवचनमिति भावः ॥

प्रधानभेदे च गुणावृत्त्येति। (कै)

प्रातिपदिकोद्देशेन तद्विधानात् प्रातिपदिकार्थस्य तत्र विशेषणत्वाद् गुणता। किं चैकस्मात् अनेकेषां परत्वासम्भव इति भावः ॥

यञ्यो बहुष्विति (भा)

भाष्ये तेनैवेत्यनुवृत्त्या प्रत्ययस्यैव बहुषु वृत्तेर्लुगभ्युपगम इति भावः ॥

यदा यञामेवेति। (कै)

उक्तरीत्यास्योपपत्तिश्चिन्त्या। लुक् शास्त्रवैयर्थ्यापादानमेवात्र भाष्यकृत् तात्पर्यविषयीभूतम् ॥

केष्वर्थेषु लौकिकाः कान्शब्दान् प्रयुञ्जत इति। लोके चैकस्मिन् वृक्ष इति प्रयुञ्जते द्वयोर्वृक्षाविति बहुषु वृक्षा इति। यदि तर्हि लोको-

---

वक्तव्यः। द्विवचनेति। भा। प्रत्यर्थं शब्दनिवेशे एकैकः शब्दः एकैकार्थाभिधायीति सह विवक्षायां निवृत्तेषु शब्दान्तरेषु शिष्यमाणेन शब्देन स्वस्मिन्नेवैकत्वार्थे अवस्थेयमिति भावः। सर्वेषु पक्षेष्वयं दोषः प्रातिपदिकैकशेषे द्विवचनबहुवचनानुत्पत्तिप्रसङ्गः। विभक्त्यन्तानां विभक्तौ वा परत एकशेषेऽर्थाभावाद्द्विवचनबहुवचनयोर्निवृत्तिप्रसङ्गः। अथ स्वभावतः शिष्य-

---

क्षायामित्यस्य द्वन्द्वग्रहणबलेनावश्यवाच्यत्वात्। अन्यथा पयः पयो नयतीत्यत्र गौणमुख्यकर्मणोरेकशेषापत्तेः। देवदेव इत्यादावपि प्रसङ्गाच्च। प्रत्युत आवृत्त्योभयविशेषणत्वे भेदमिति न सिध्येत्। तथा हि। भिक्षा ३ आम्

तत्र प्रथमस्य सान्निध्यात् सन्निपातोऽन्यस्य व्यवहितत्वान्नास्तीति वैरूप्यमिति भावः ॥

अभ्यन्तरीति। (कै)

गार्ग्यशब्दविशिष्टयशब्दद्वयस्य प्रातिपदिकत्वे तदर्थगतसङ्ख्याभिधायितया प्रवृत्ता विभक्तिः साहृप्योपलक्षणतायां प्रकृतिं न त्यजतीत्यर्थः ॥

न च यञामिति। (कै)

यञ् समुदायस्येत्यर्थः ॥

समुदायार्थः। (कै)

अपत्यसमुदायरूपोऽर्थः। अपत्याद्यर्थस्य सम्बन्धिकत्वादिति भावः ॥

गम्येत। यो हि गामश्व इति ब्रूयादश्वं वा गौरिति न जातुचित् संप्रत्ययः स्यात्॥ तेनानेकार्थाभिधाने यत्नं कुर्वतावश्यं लोकः पृष्ठतोऽनुगन्तव्यः।

तेनोद्यन्तातुल्यम् द्वितीयमुद्यन्तारमन्तरेणेत्यर्थः। अथवा तत्तुल्यमिति द्व्यादिशब्देषु अप्येतत्तुल्यमित्यर्थः। प्रथमेति। भा। एकस्मिन् पुरुषे क्रियाया एकत्वान्नास्त्येकशेषः पुरुषभेदेन तु प्रत्यक्षपराक्षादिभेदे विरोधात् क्रियाया अनेकत्वादेकशेषो वक्तव्यः। कृते चैकशेषे प्रकरणादिवशादर्थविशेषावसायः। यदा तु युष्मदस्मदी एवानेकार्थाभिधानसमर्थे इति पक्षः। अत्रापि च निवृत्तभेदाया एव क्रियाया आख्यातेनाभिधानं तदेकशेषो न

प्रसङ्गं वारयितुम् एकविभक्ताविन्यस्य सरूपाणेवेत्येतद्विशेषणतया आवश्यकत्वे स्थिते एकशेषविशेषविशेषणत्वायोगात्। आवृत्तौ मानाभावात् फलाभावाच्च। न च पयः पयो जरयतीत्यादिष्वावृत्तिः फलम्। सहविव-

सिद्धमिति। (भा)

सुबन्तात् तद्धितोत्पत्त्या तत्पक्षे एकशेषस्यान्तरङ्गत्वात्। एवं च "सर्वत्र" इत्यसङ्गतमिति भावः॥ इदानीं तस्य सार्थक्यं दर्शयितुमपत्यार्थ एव पक्षत्रयेऽपि दूषणमाह

अपत्यादिष्विति॥ (भ()

एका प्रकृतिरिति। (भा)

अर्थभेदादभिन्नैवेत्यर्थः॥

तद्धितान्तत्वादिति। (कै)

अपत्यशब्दस्यापि गर्गादिषितत्वेन समुदायस्य तद्धादितदन्तत्वादिति भावः॥

प्रकृतिसन्निपातेति। (कै)

प्रयोगं तस्यार्थस्य गतिर्भवतीति। एवमिहाप्येकशेषकृतमेतद्येनात्रैकोऽयमवशिष्यत इत्यनेन द्व्यर्थता बह्वर्थता वा भवति॥ उच्येत तर्हि न तु

स्तदपेक्षाः प्रवर्त्तन्ते इत्यर्थः। इदानीमेतद्वैधर्म्यरहितं द्वितीयं दृष्टान्तं व्यक्ति। एकैक इति। भा। यथोद्यन्तॄणां परस्परसन्निधिकृतं कर्तृत्वमेकैकापाये च निवर्त्तते तथा द्व्यादिव्यपदेशोऽपीत्यर्थः। कथं तत्रेति। भा। न्याय्यमित्यध्याहारः॥ एकैक इति। भा। कर्तृत्वमेकैकापाये परस्परनिरपेक्षमित्यर्थः। कारणमुद्यमनं चेदिति। भा। कर्तृत्वप्रतीताविव्यर्थः। कार्य्यकल्पितत्वात् शक्तीनामेवमुक्तम्। तत्तुल्यमिति। भा।

उपक्रम एव यथा व्याख्यातं तद्रीत्या अनैमित्तिक एवैकशेषः। तथा च पक्षत्रयं स्थितं सिद्धान्ते। अत्रेदमवधेयम्। उक्तपक्षत्रयमध्येऽपि समुदायादेकविभक्ताविति पक्षस्तावद्दुष्ट एव। मातृमातारावित्यत्राति-

त्पक्षेऽप्येकशेषो न प्राप्नोति। न च विनिगमनाविरहेण प्रत्येकमुत्पत्तौ अण् त्रयापत्तिः। तावतापि च च भैक्षमित्यस्याप्यापत्त्या नियतभैक्षा-[1]सिद्धस्तदवस्थत्वात्। किञ्च प्रातिपदिकानाञ्चैकशेषे सिद्धमिति भाष्ये न्यूनताप्रत्येकं द्विवचनाद्यन्तानामेकशेष इति पक्षेऽपि त्वदुक्त-रीत्या दोषाभावात्। युगपदधिकरणवचनतायां दुःखत्वदुरुपपादत्व-योर्द्वितीये भाष्ये वक्ष्यमाणतया [2]तत्पक्षोक्तिसम्भवाभावाच्च। समर्थ-ग्रहणेन तु न विभक्तिनिमित्तकार्य्यस्य पूर्वप्रवृत्तिः। विश्वौच आगतं विश्ववाड्रूप्यमित्यादे[3]"विभाषा पूर्वाह्णे"ति सूत्रभाष्यस्यासङ्गत्या-पत्तेरित्याहुः॥ प्रातिपदिकैकशेषपक्षे मातृमात्रादौ यथा नैकशेष-स्तथोक्तमेव॥ भाष्ये

---

१ भैक्षासिद्धेस्तदावश्यकत्वात्। ग॥

२ तत्पक्षस्योक्ति-। क॥ ३ अ ४। पा ३। सू १४॥

तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवतीति अग्निचित् सोमसुदिति यथा। ते मन्यामहे लोपकृतमेतद्येनात्रान्तरेणापि तद्वाचिनः शब्दस्य

स्याद् न तु साधर्म्यम्। यत्र साधर्म्यं तत्र वैधर्म्योद्भावने न कश्चिदपि हेतुः स्यादित्यर्थः। मात्रादयश्च शब्दाः सम्बन्ध्यन्तरापेक्षयैकस्मिन् आश्रये वर्त्तन्त इति सम्बन्ध्यन्तरविनाशेऽपि आश्रयसद्भावाद्युक्तं यत्प्रवर्त्तन्ते द्व्यादयस्तु समुदायनिवेशिन एकापाये तत्समुदायाभावात् कथं प्रवर्त्तेरन्। एतच्च वार्त्तमिति। भा। एतद्युक्तम्। यदाश्रयसन्निधानादेकोपायेऽपि मात्राद-

---

तथा च रामश्च कृष्णश्चेति लौकिकवाक्यस्यादूरविप्रकर्षेण विग्रहतया प्रदर्शनेऽपि अलौकिकद्वन्द्वैकशेषयोः प्रक्रियावाक्ये राम औ कृष्ण औ इति प्रविशति। तथा च विभक्त्यन्तानामेकशेषोऽपि निर्बाध एव। अथवा

संसर्गद्वारकमर्थवत्त्वमस्य नेति न नियमेन व्यावृत्तिरिति तात्पर्य्यम् ॥

तत्र सरूपसमुदायादेकविभक्तावेकशेषपक्षे दोषमुपपादयति

तत्र भिक्षेति। (कै)

पदस्य विभज्यान्वाख्यानपक्षे इदम्। आबन्तसमुदायस्य चा-प्रत्ययान्तत्वात् प्रातिपदिकत्वमिति भावः॥ "स्त्रीप्रत्यये चानुपसर्ज-नेने"ति तु स्त्रीप्रत्ययत्वेन तद्व्याप्यधर्मेण वा स्त्रीप्रत्ययग्रहणे इति तात्पर्यम् ॥

तदासुबन्तसमुदायादिति। (कै)

तस्य सुबन्तत्वपर्य्याप्त्यधिकरणत्वाभावादिति भावः। एवं च भाष्ये "सर्वत्र" शब्देन पक्षद्वयमेव ग्राह्यमिति तात्पर्य्यम्। वस्तुतस्तु तद-वयवादेकस्मात्तस्य दुर्वारत्वेन तत्पक्षे परत्वादादिवृद्धौ वैरूप्यात्त-

---

द्व्यर्थता बह्वर्थता वा शक्या लब्धुम्। तच्चैकशेषकृतम्॥ न ह्यन्तरेण तद्वाचिनः शब्दस्य प्रयोगं तस्यार्थस्य गतिर्भवति। पश्यामस्तु पुनरन्तरेणापि

मातेति। यथा सुतं जन्मनः प्रागलब्धमातृव्यपदेशं स्त्रीपश्चाल्लभ्यते एवं संख्येयान्तरापेक्षायां सत्यां पूर्वमप्रवृत्तो द्विशब्दः पश्चात्प्रवर्तत इत्यर्थः। अपायेष्वपीति। पुत्रविनाशेऽपि पितृव्यपदेशो न निवर्त्तते पितृविनाशे पुत्त्रव्यपदेशः। चतुर्णां त्वेकापाये नास्ति चतुःशब्दस्य प्रवृत्तिः। अन्यादि-दानीमिति। अवश्यं साधर्म्ये सति वैधर्म्येण भाव्यम्। अन्यथा तत्त्वमेव

चान्यतरवैयर्थ्यम्। परस्परसमभिव्याहारेणैवोभयार्थताध्यवसायात्। तथा च द्वन्द्ववृत्तेः प्रागेकैकार्थतावगमेऽपि वृत्तावुभयाभिधानात् प्रत्येकं द्विवच-नाद्युत्पत्तिः। एवमेकशेषवृत्तावपि परार्थाभिधानं वृत्तिरिति सिद्धान्तात्।

अवयवारभ्यत्वात् समुदायसङ्ख्यायाः समुदायगतसङ्ख्याभिधायि समुदायविभक्त्यैवावयवार्थेऽपि तत्सङ्ख्याप्रतीतेर्गतार्थत्वान्नावयवेभ्यः पृथग् विभक्तिप्रसङ्ग इति भावः॥ अवयवानां पदत्वादिरूपो यकारस्य समुदायविभक्त्याऽसम्भवाच्चिन्त्यमिदम्। किञ्च विशेष्यविभक्त्या विशेषणीय[1]सङ्ख्यादीनामुक्तावपि विशेषणाद् यथा साधुत्वाय विभक्तिः क्रियते तथाचापि दुर्वारेति। तस्मात् प्रत्येकगतसङ्ख्याया अविवक्षणान्न प्रत्येकं सुबुत्पत्तिः समुदायगतबहुत्वसङ्ख्याया एव विवक्षणेन तद्बोधकसमुदायादेव विभक्तिस्तावतापि "अपदं न प्रयुञ्जीत" इति निषेधातिक्रमाभावादिति भाष्यार्थः। प्रत्येकसङ्ख्याविवक्षाभावेऽपि बहुत्ववत्त्वेनविवक्षणात् पृथक् प्रयोगार्हत्वमप्येषां नेति। भेद-

१ "सङ्ख्यादीनाम्" इत्यारभ्य "प्रत्येकगत" इत्यन्तं नास्ति इ पुस्तके॥

अथ वाचनिकी तद्वक्तव्यमेकोऽयमवशिष्यते स च द्व्यर्थो भवति बह्वर्थश्चेति। न वक्तव्यम्। सिद्धमेकशेष इत्येव। कथं पुनरेकोऽयमवशिष्यत इत्यनेन

एकस्यानेकार्थत्वं सम्भवति। यदा तु समुदायवाचित्वं द्व्यादीनामभ्युपगम्यते तदा वनादिवदेकवचनप्रसङ्गः। यत्तु वनानीति बहुवचनं तत्समुदायप्रचयविवक्षायां न त्ववयवभेदविवक्षायाम्। समुदाया इति। समुदायवाचिन इत्यर्थः। किं कृतमिति। एकश्चैकश्चेति विग्रहे कथं द्विशब्दः प्रवर्त्तत इति प्रश्नः। अन्योऽन्यकृतमिति। परस्परापेक्षया द्वित्वोत्पत्तौ सत्यां प्रक्रियावाक्यमिदं भवति द्वौ च द्वौ चेति। तत्रैको द्विशब्दः शिष्यते।

यानि सरूपाण्येवेति व्याख्यानान्न भवति। यदा युगपदधिकरणवचनतायां द्विवचनबहुवचनान्तानामेकशेषः। द्वन्द्वोऽप्येवम्। अजहत् स्वार्थायां हि वृत्तौ रामकृष्णावित्यादौ पूर्वपदमप्युभावभिधत्ते तावेवोत्तरपदमपि। न

वाक्योपप्लववत् कर्तृरूपार्थभेदेनापि वाक्योपप्लवादनेकप्रसङ्गो दुर्वारः। अत एवाग्रे एकप्रकृतेरनेकश्रुत्युत्पत्तिं भाष्यकृद् वक्ष्यति॥

जात्याश्रयणादिति। (कै)

जात्याश्रयानेकव्यक्त्याश्रयणादित्यर्थः॥

अर्थतः आन्तर्य्यादिति। (कै)

द्व्यर्थस्य त्वद्वयस्य द्विवचनं बह्वर्थस्य त्वसमुदायस्य बहुवचनमिति भावः॥ केचित्तु अनेकत्वकारोत्पत्तौ न मानं कर्तृत्वारोपवत् एकस्मिन्ननेकार्थत्वस्याप्यारोपात् इत्याहुः। एवं चानवकाशत्वादेकशेषो द्वन्द्वबाधक इति स्थितम्। भाष्ये "अथवा पुनरि"त्यादिना समुदायादेकविभक्ताविति पक्षः समर्थ्यते॥

समुदायविभक्त्यैवेति। (कै)

एकेनोक्तत्वात्। वा॥ अशिष्य एकशेषः। किं कारणम्। एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति॥

गार्ग्यस्त्वेत्यस्याप्यर्थस्य संभवात् संदेहादर्थासंप्रत्ययः। उत्तरकालं तु प्रकरणादिवशात् संदेह निवृत्तिः॥

ननु "वृद्धो यूने"ति वचनात् सन्देहेऽप्येकशेषः स्यात् अस्य तु निःसन्देहविषयसम्भवात् कथं सन्दिग्धविषये प्रवृत्तिः। नैतदस्ति। अक्षादिष्वपि सन्देहविषयेष्वस्य प्रवृत्तिदर्शनात्। एवं तर्हीति। अर्थासम्प्रत्यये सत्यन्यपदार्थत्वादित्ययं हेत्वर्थः। यदि तर्हीति। प्रत्यर्थं शब्दनिवेशादेकशेषे सति

सुबन्तमित्यस्यानुवृत्त्या बाध्यते। अस्मिन् पक्षे मातृमात्रोरपि एकशेषः प्राप्तः। एकविभक्तावित्यस्यावृत्त्या एवकारस्यचानुकर्षणेन एकविभक्तौ

द्वित्वादिप्रतीतौ हि उत्तरया पूर्वसञ्ज्ञाबाधनात् तद्विहतिः (तद्रहितः) स्यादिति भावः ॥

कर्त्तृकर्मेति। (कै)

अस्यारोपितेत्यादिः ॥ भाष्ये साधनशब्देन तिङन्ताभिधेयकर्तृकर्मगतसञ्ज्ञाविशेष उच्यते। तदपेक्षाणि। तदारोपापेक्षाणि। एवं [1]चैकस्मिन्नेव तदारोपान्नपदभेदप्रसंग इति [2]नैकशेषस्यान्यविषय इति भावः ॥

अनेकेनैवेति। (कै)

[3]"वर्त्तमाने लड्" इत्यत्र सञ्ज्ञाविवक्षणेऽपि [4]धातुभेदेन

१ कस्मिन्नेव। इ॥ २ नैकशेषस्यान्नविषय इति भावः। क। इ॥
३ अ ३। पा। सू १२३॥ ४ धातुभेदे च। इ॥

शेषारम्भोऽनर्थकः स्यात्॥ इह हि शब्दस्य स्वाभाविकीवानेकार्थता स्याद्वाचनिकी वा। तद्यदि तावत् स्वाभाविकी। अशिष्य एकशेष

शेषो भवति एको मीमांसकशब्दो ण्वुलन्तत्वान्मध्योदात्तः परन्तु मीमांसामधीते इति क्रमादिभ्यो वुन्नित्याद्युदात्तस्तस्य शेषः। एकस्येति। द्वन्द्वोऽप्यत्रानभिधानान्न भवति। अर्थासंप्रत्ययादिति। यत्रैकः शब्दोऽनेकमर्थमभिधातुं शक्नोति तत्रैकशेषो नान्यत्र। प्रयुक्तानामन्वाख्यानात्। एकाविति चोक्तेऽसहायादिरर्थो गम्यते न तु द्वावित्यर्थः। अन्यपदार्थत्वाच्चेति। असंदिग्धेन पदान्तरेणायमर्थः प्रत्याय्यत इत्यर्थः। गार्ग्याविति। गार्ग्यस्य

सम्भवात्। तथाच समुदायादेकविभक्तौ परत एकशेषः। रामकृष्णावित्यादौ तु यद्यप्युक्तरीत्या समुदायादेकविभक्तिः। प्राप्ता तथापि द्वन्द्वविधावनेकं

आख्यातेति। (कै)

शब्दशक्तिस्वभावादिति भावः॥ सर्वैव सर्वापि निवृत्तभेदात् (भेदाः।द।) स्वतोद्वित्वादिसंख्यारहिताभेदस्य तत् सहचरितद्वित्वादेः स्वगतमेकत्वं तु प्रतीयत इत्येकवचनमिति भावः॥

प्रकर्षाभ्यावृत्त्यादयस्त्विति। (कै)

अभ्यावृत्तिरत्र गणनम्॥

[1]आश्रयाभ्यावृत्तीति।

आश्रयप्रकर्षात् प्रकर्षः। अभ्यावृत्तिर्जन्म तत् गणनमेव क्रियागणनमिति भावः॥

[2]एकत्वं न विघ्नन्तीति। (कै)

१ उपलब्ध कैयटपुस्तके तु "आश्रयप्रकर्षाभ्यावृत्ती"ति पाठोऽस्ति॥
२ "नैकत्वं क्रियायां विघ्नन्ति" इत्युपलब्ध कैयटेऽस्ति॥

स्वैकः। एक एकार्थः॥ नैकार्थ्यम्। नायमेकार्थः। किं तर्हि। द्यर्थो बह्वर्थश्च। नैकार्थ्यमिति चेदारम्भानर्थक्यम्। वा॥ नैकार्थ्यमिति चेदेक-

---

समानार्थत्वमस्ति। वक्रदण्डश्चकुटिलदण्डश्चेति द्वन्द्वनिवृत्त्यर्थमेतद्वक्तव्यं तेनैवात्रो बह्वित्यपि पक्षे आश्रीयमाणे इष्टं सिध्यति। यदात्वनन्तं यद्बहुष्वित्याश्रीयते तदाऽव्यविकल्पायाश्रयणात् वक्रदण्डश्च कुटिलदण्डश्चेति वाक्यमेव भवति न तु द्वन्द्व इति न वक्तव्यो विरूपाणामेकार्थानामेकशेषः। स्वरभिन्नानामिति। स्वरेण भिन्नानामित्यर्थः। अक्षश्चेति। एकोऽक्षशब्दोऽशेर्देवन इति सप्रत्ययान्तत्वादन्तोदात्तः। द्वितीयस्तु घञन्तत्वादाद्युदात्तस्तस्यैव

(१।२।४५) सूत्रे। तथाच एकाज्द्विर्वचनन्यायेन समुदायप्रातिपदिकादेव द्विवचनबहुवचनयोरुत्पत्तिः। तावताप्यवयवानां संख्यान्वयेनानुग्रह-

भिन्नार्थत्वादिति। (कै)

सर्वेषामर्थानां सर्वैः शब्दैः साहित्येनार्थप्रतिपादनविवक्षाभावादिति भावः॥

इत्याहेति। (कै)

इत्याशयेनाहेत्यर्थः॥

अथापीति। (भा)

निदर्शयितुमित्यनेन च वक्ष्यमाणस्यासाधुत्वं बोधितम्। यथा वा लौकिकविग्रहवाक्येनासाधुनापि समाससंज्ञाप्राप्त्यवस्थानिदर्शनं तथानेनापीत्यर्थः॥

द्रव्यवाचीनामिति। (कै)

सत्त्ववाचिनामित्यर्थः॥ ननु कर्त्रादिभेदात् क्रियाभेदावगमेनैका क्रिया इत्यनुपपन्नमत आह

द्विवचनबहुवचनयोश्चाप्रसिद्धिः। किं कारणम्। एकार्थत्वात्। एकोऽयमवशिष्यते तेनानेन तदर्थेन भवितव्यम्। किमर्थेन। यदर्थ एकः। किमर्थ-

---

तत्प्रतिकृतिबहुत्वे काश्यपशब्दानामेकशेषे कृते अजन्तं बहुषु वर्त्तत इति लुक् प्रसङ्गः। लौकिकस्येति। अपत्यस्येत्यर्थः। न चैतदिति। प्रतिकृतिवृत्तित्वान्नैतदजन्तमपत्यवाचि। एका प्रकृतिरिति। प्रकृत्यर्थस्यैकत्वात् तेन च बहूनामप्यपत्यानां सम्बन्धसम्भवात्। सिद्धं त्विति। सत्यपि प्रकृतिसन्निपातकृते एकस्य वैरूप्ये सर्वेषां प्रकृत्यर्थविशिष्टापत्याभिधायित्वात्

नियमस्य सजातीयविषयकत्वेन यत्र समुदाये पूर्वो भागः पदम् तत्रैव प्रवृत्तेः। अत एव बहुपटव इत्यत्र प्रातिपदिकत्वं भवत्येव इत्युक्तं "अर्थवत्"-

विवक्षिते इति। (कै)

अनेन सूत्रेऽपि विषयसप्तमीति दर्शितं कारकशक्तेः शब्दात् परत्वासम्भवात् इति बोध्यम् ॥

लुप्तप्रत्ययस्येति। (कै)

बहुव्रीहिः ॥

एकार्थत्वाच्छिष्यमाणस्येति। (कै)

न च शिष्यमाणं लुप्यमानार्थाभिधायीति न्यायविरोधः। प्रत्येकपर्य्याप्तैकत्वविशिष्टानामेव शिष्यमाणशब्दबोध्यतया द्वित्वादिविशिष्टार्थाप्रतीत्या द्विवचनाद्यसिद्धिरिति भावः ॥

एवं चैकैकस्येति। (कै)

युगपदधिकरणवचनताश्रयेणेति भावः। सर्वेषामर्थानां सर्वैः शब्दैः युगपद्बोधनेच्छा हि सह विवक्षेति तात्पर्य्यम् ॥

पचावः। पचति च पचसि च पचामि च पचामः। किं पुनः कारणं न सिध्यति। असरूपत्वात् ॥ द्विवचनबहुवचनाप्रसिद्धिश्चैकार्थत्वात्। वा ॥

गार्ग्यशब्दानामेवैकशेषः क्रियत इत्यर्थः। यञञोर्बहुष्विति। यदा यञामेवैकशेषः क्रियते तदा शिष्यमाणो यशब्दो बहुषु वर्त्तत इति लुक् सिध्यति गार्ग्यशब्दानां त्वेकशेषे यशब्दो बहुषु न वर्त्तते किं तर्हि यशब्दान्त इति लुङ् न सिध्यति। यञन्तं यदिति। तेनैव चेत् कृतं बहुत्वमित्यपि तदन्ते नेति व्याख्यायते। काश्यपा इति। एकस्मिन् काश्यपापत्येऽञि कृते

समुदायस्याप्येका प्रातिपदिकसंज्ञा तावदस्ति। मिलितेन ह्यर्थवत्त्वात्। न चार्थवत् समुदायानां समासग्रहणं नियमार्थमित्युक्तेः कथमेतदिति वाच्यम्।

लेकविभक्तिरिति ॥ न चैवं नृणां नृणामित्यादावेकशेषानापत्तिः। दीर्घस्य वैकल्पिकत्वेन साध्यनियमाभावादिति वाच्यम्। विरूपाणामपि समानार्थानामिति सिद्धेः। यत्त्वेकग्रहणसामर्थ्येन यद्विभक्तिविषये एकशेषस्तस्यामेव सारूप्यमित्यर्थात्। तृतीयादौ मातृमात्रोरेकशेष सिद्धिरिति तन्न। वार्त्तिककारं सर्वत्र प्रतिषेधेन पचयोः फलभेदापत्तेरित्यलम् ॥ भाष्ये

किं वक्तव्यमिति। (भा)

एकविभक्तौनामिति षष्ठ्यन्तं वक्तव्यं किमित्यर्थः ॥

तेन हीति। (कै)

बाहुलकात्करणसाधनः। कारकशक्तिवाचीविभक्तिशब्द आश्रीयत इति भावः ॥

प्रथममध्यमोत्तमानामेकशेषोऽसरूपत्वात्। वा ॥ प्रथममध्यमोत्तमानामेकशेषो वक्तव्यः। पचति च पचसि च पचथः। पचसि च पचामि च

यशब्दानां सारूप्यादेकशेषो विधास्यते। नैतदस्ति। विभक्त्युत्पत्तावभ्यन्तरीकृताप्रकृतिर्विभक्तिलक्षितसारूप्याश्रये एकशेषे कथं हातुं शक्यते। न च यञां प्रकृत्यर्थानपेक्षः समुदायार्थः तत्कथं प्रकृतिर्वर्ज्येत। यदापि सहविवक्षायां विभक्त्यन्तानामेकशेष इति पक्षः तदा गर्ग य अस् य अस् य अस् इति स्थिते पूर्वस्य य अस् शब्दस्य प्रकृतिसन्निपाताद्वैरूप्यं प्रातिपदिकैकशेषपक्षेऽपि तथैव वैरूप्यमित्येकशेषो न प्राप्नोति। एवं प्रकृतयोऽपीति। एकैकस्यापत्यस्य प्रकृत्यर्थेन योगात् प्रधानभेदे च गुणस्यावृत्त्या

इत्येकशेषे सर्वनामत्वाभावप्रसङ्गात् तदेवं त्रयः पक्षा दुष्टा एवेति स्थितम् ॥ सिद्धान्तस्तु त्रेधा। तथा हि। राम राम राम इत्यत्रावयवानामिव

क्वचित्सारूप्ये इति। (कै)

वस्तुतस्तु विभक्तित्वावच्छेदेन सारूप्यविवक्षणान्न मातृमात्रादौ दोष इति बोध्यम्। एकशब्दस्वारस्येनैव एकापकर्षणेन चैकस्यामपि विभक्तौ यानि विरूपाणि इत्यर्थात् इति दिक्॥ एकग्रहणफलं तु चिन्त्यमेव। अत एव पृथक् सर्वेषां विभक्त्यन्तानामेकशेष इति पक्षे एकग्रहणं पृथक् विभक्तिप्रतिषेधार्थमित्युक्तम्। तेन हि तदतिरिक्त-पक्षेषु तद्वैयर्थ्यं ध्वनितं तत्पक्षेऽपि न वार्थविप्रतिषेधादिति तत् प्रत्याख्यातमेव। अत्रापि विभक्तिः सारूप्येणाश्रीयत इत्येवोक्तं न

सन्ति पुनः केचिदन्येऽपि शब्दा येषामन्योऽन्यकृतो भाव इति तत्रैते-ऽस्माभिरुपन्यस्ताः। तत्रैतद्भवानाह सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्त्तन्त इति। एतच्च।

एकैको नोद्यन्तुं भारं शक्नोति यत्कथं तत्र।
एकैकः कर्त्ता स्यात् सर्वे वा स्युः कथं युक्तम्॥
कारणमुद्यमनं चेन्नोद्यच्छति चान्तरेण तत्तुल्यम्।
तस्मात् पृथक् पृथक्ते कर्त्तारः स व्यपेक्षास्तु॥

लघुत्वादन्तरङ्गत्वात् पूर्वमेकशेषः पश्चाद्वृद्धिरथवा तद्धित एव पश्चादुत्प-द्यत इति भावः। बहवश्च यञ इति। प्रत्यर्थशब्दनिवेशाद् बहुष्वपत्येषु बहवो यञ उत्पाद्याः। तत्र गर्ग य य य इति स्थिते समुदायस्य तद्धिता-न्तत्वात् प्रातिपदिकत्वात्तत एका विभक्तिस्तत्र प्रथमस्य यशब्दस्य प्रकृति-सन्निपातकृतं वैरूप्यमित्येकशेषो न प्राप्नोति। ननु प्रकृतिं विहाय

"विभाषा जसि" (१।१।३२) इति प्रवर्त्तेत। अत एव विरूपैक-शेषो न कृतद्वन्द्वानां तेषामित्यादौ "त्यदादीनि सर्वैः" (१।२।७२)

सारूप्येणेति। (भा)

तेन स्वोपलक्षकतया विभक्तिराश्रीयते इति भावः॥

ये त्वाहुरिति। (कै)

प्रातिपदिकग्रहणं चोपलक्षणमिति भावः॥

हरितहरिणयोरिति। (कै)

विभक्तौ यानि सरूपाणि दृष्टानि तदवयवप्रातिपदिकानामित्यर्थ इति भावः॥

अन्यतरस्येति। (कै)

शिष्टस्यान्यतरस्योभयवाचित्वेनेत्यर्थः॥

जातिवाचित्वं चेति (कै)

चकारघटितः पाठः॥

भातेति॥ विषम उपन्यासः। सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्त्तन्ते। इह पुनरेकेनाप्यपाये न भवति चत्वार इति॥ अन्यदिदानीमेतदुच्यते सकृदेते शब्दाः प्रवृत्ता अपायेष्वपि वर्त्तन्ते इति। यत्तु भवानस्मांश्चोदयति

न लुमताङ्गस्येति प्रतिषेधात् प्रातिपदिकैकशेषपक्षे समर्थं यद्ङ्याप्प्रातिपदिकं तस्मात्तद्धिता इत्याबन्तादणि कृते परत्वादादिवृद्धौ कृतायां वैरूप्यादेकशेषाप्रसङ्गः। यदा तु सहविवक्षायां विभक्त्यन्तानामेकशेषः सुबन्ताच्च तद्धित इत्ययं पक्षस्तदा सुबन्तसमुदायात्तद्धिताभावात् पूर्वमेकशेषः पश्चात्तद्धित इति न कश्चिद्दोषः। प्रातिपदिकानां चेति। अनेमि-

---

स्यात्। अपि च करौ करा इत्यादि न सिध्येत्। प्राण्यङ्गानां समाहार एवेति नियमात्। अपि च सर्वेषामित्यादौ "द्वन्द्वे च" (२।२।२९)

तेनेत्यादि॥ (कै)

पक्षासंभवेति। (कै)

लौकिके प्रयोगे सरूपाणामित्युक्ते प्रातिपदिकैकशेषस्योक्तिसम्भव एव न किन्तु विभक्त्यन्तानामेकशेष इति पक्षस्यैवापत्तिरिति भावः॥

अथानेनेति। (भा)

यद्यनेन पक्षेण प्रयोजनं स्यात्तदा सोऽपि समर्थयितुं शक्यम् इति शेषः॥ अपर आह

वाढ़मर्थ इति॥ (भा)

स एवाह

किं वक्तव्यमिति। (भा)

प्रातिपदिकानामेकशेष इति सूत्रं कर्त्तव्यं चेत्यर्थः॥

भवन्ति। तद्यथा। यूथम् शतम् वनमिति॥ सन्तु तर्ह्येकशेषशब्दाः। किं कृतं सारूप्यम्। अन्योऽन्यकृतं सारूप्यम्। सन्ति पुनः केचिदन्येऽपि शब्दा येषामन्योऽन्यकृतो भावः। सन्तीत्याह। तद्यथा। माता पिता

समासादिकस्यां विभक्तौ परतः सरूपसमुदायाद्वा विहितायामेकविभक्तौ परतः प्रातिपदिकानां वा सहविवक्षायां प्रत्येकं द्विवचनबहुवचनान्ताना-मिति। तत्र पश्चिमं पक्षत्रयमङ्गीकृतम्। तत्र भिक्षा भिक्षा भिक्षा आम् अ इति स्थिते सर्वविधिभ्यो लुग्विधेर्बलवत्वाद् लुकि कृते विभक्त्यभावादेक-विभक्तौ परतो विधीयमान एकशेषो न प्राप्नोति प्रत्ययलक्षणं च नास्ति

मपि समानार्थानामिति तु यद्यपि प्राप्नोति तथापि पक्षे ऋच इत्यस्य शेषे टापि ऋचे ऋचा इत्याद्यपि स्यात्। एवं पथा पथौ इत्याद्यपि पक्षे

प्रातिपदिकग्रहणमिति। (कै)

तदननुवृत्तौ लौकिके प्रयोगे सरूपाणामित्युक्तेऽपि अन्तरङ्गत्वादेकशेषप्रवृत्तिर्विभक्त्युत्पत्तेः पूर्वमेवेति। सुप्प्रकृतीनामेवैकशेषसिद्धिरिति भावः। लौकिकप्रयोगस्य येषामेकशेषस्तत्प्रकृतिकविभक्त्यन्त एव प्रत्यासत्तेः। एतेन हरिणीशब्दस्यापि तत्प्रकृतिकतद्धितघटितप्रयोगे वैरूप्यमस्त्येवेति परास्तम्॥ नन्वन्यत्र १"तरप्तमपौ घ" इत्यादौ लौकिकासंभवे शास्त्रीयग्रहणस्योक्तत्वादत्रापि तथैवास्त्वित्यत आह

शास्त्रेऽपीति। (कै)

लौकिकतादृशप्रयोगत्वावच्छेदेन च सारूप्यं विवक्षितं तदाह

१ अ १। पा १। सू २२॥

एकशेषशब्दाः। यदि तर्हि नेम एकशेषशब्दाः समुदायशब्दास्तर्हि भवन्ति। तत्र को दोषः। एकवचनं प्राप्नोति। एकार्था हि समुदाया

नलोपादीनि पदकार्य्याणि पूर्वपदेन स्युः। उत्तरपदमेव तु तत्रासुबन्तम्। इह राजन् राजन् औ इति स्थिते परत्वान्नित्यत्वाच्चोपधाया दीर्घे कृते वैरूप्यादेकशेषो न प्राप्नोति। उच्यते। विरूपाणामपि समानार्थानामिति भविष्यति अन्तरङ्गत्वाद्वा। दीर्घत्वं हि नान्तरङ्गम्। उपधां विभक्तिविशेषमसंबुद्धिसर्वनामस्थानमपेक्षत इति बहिरङ्गम्। सर्वत्रेति। षट् पक्षा इहोपक्षिप्ताः पृथग्विभक्तौ परत एकशेषः। एकवचनान्तानां वा

कृते विभक्तेरकारेण व्यवधानादेकशेषो न स्यात्। समासान्तो हि समासभक्तस्तमेव न व्यवदध्यात्। स्वरूपं तु व्यवदधात्येव। समासार्थोत्तरपदस्यावयव इति भाष्यमतेऽपि विरूपत्वादेकशेषो दुर्लभः। विरूपाणा-

भाष्याभिप्रेतत्वे तु "विरूपाणामनेकशेष" इत्यादिप्रागुक्तभाष्य-विरोध इति दिक् ॥ तद्ध्वनयन्नाह

अभ्युपगम्यवादेनत्विति॥ (कै)

सर्वदेति। (कै)

सर्वंच इत्यर्थकम् ॥ अत्रैव पक्षे दूषणान्तरमाह

हरितेति। (भा)

लिङ्गविशिष्टपरिभाषासनाश्रित्येदम् ॥

सा च स्त्रीति। (कै)

एवं १"वर्णादनुदात्तात्" इति ङीप्रकारौ॥ ननु लौकिकप्रयोगे सरूपत्वेऽप्येषां प्रातिपदिकाद्यभावात् कथमेकशेषसिद्धिरत आह

१ अ ४। पा १। सू ३९॥

संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चेति। यत्र ह्यर्थासंप्रत्यय एव वान्य-पदार्थतैव वा भवति तत्रैकशेषो गार्ग्यौ विंशतौ इति यथा॥ अथवा नेम

बहुवचने भविष्यत इत्यदोषः। तुल्यजातीयस्येति। अवयवानां समुदायार्थ-तन्त्रत्वात् समुदायविभक्त्यैवावयवार्थस्य संख्यावगमात् पृथगवयवेभ्यो विभक्ति-र्नोत्पद्यते विरूपसमुदाये तु सुबन्तानां द्वन्द्ववचनेनायं न्यायो बाध्यते इत्यवयवेभ्य एव विभक्त्युत्पत्तिः। सुबन्तानामिति। यद्यपि गतिकारकोप-पदानां कृद्भिः सहसमासवचनं प्राक् सुबुत्पत्तेरित्युच्यते तथापि पूर्वपदं तत्र सुबन्तमेवेति सोऽपि तदपेक्षया सुबन्तानामेव समासः। अन्यथा

इष्यते तु आद्युदात्तम्। अशेः क्वनिप् व्युत्पादनात्। "योऽश्वेभिर्वहते विभवो ह्यश्व" इत्यादौ तथैव प्रयोगाच्च। किं च ऋक् च ऋक् च ऋचावित्यत्रान्तरङ्गत्वाद् "ऋक्पूर" (५। ४। ७४) इति समासान्ते

मेवैकशेष इत्येवं निरूढेन प्राप्तेः[१]। मातृभ्यां कृतं देहीति च भ्रचा भज्यन्तामित्यादिवत्॥ "अयमतम्" इत्यनेनारुचिर्बोधिता। तद्बीजं तु सूत्रव्याख्यानपक्षभेदेन कल्प्यभेदानौचित्यमिति। तस्माद्विभक्त्यन्तानामेकशेषेऽपि "मातृमात्रोः प्रतिषेधो वक्तव्य" (भा) एवेति गूढ़तात्पर्य्यम्॥ तद् ध्वनयन्नाह

एवं च कृत्वेति। (भा)

एवमङ्गीकृत्यप्रातिपदिकानामेकशेषे एव प्रतिषेधश्चोद्यते इत्यर्थः। वस्तुतो विभक्त्यन्तानामेकशेषेऽपि तद्वक्तव्यमित्यर्थः। अस्य मतस्य

१ प्रतिषेधेन सह विवक्षाविषयैकशेषस्यनिषेधे तद्विषये द्वन्द्वः पक्षे वाक्यं च सिध्यति। असहविवक्षाविषयतत्त्वं तु भवत्येव। इत्यस्ति क पुस्तके॥

भवति चैकशेषः। यदप्युच्यतेऽन्यपदार्थत्वाच्चेति। अन्यपदार्थेऽप्येकशेषो भवति। तद्यथा। विंशतिश्च विंशतिश्च विंशती इति। तयोश्चत्वारिंशदित्यर्थः॥ एवं तर्हि नेमौ पृथक्परिहारौ। एकपरिहारोऽयम्।

स्यत इत्यादौ वस्तुस्थित्याकर्तृभेदाद् भेदेऽपि तिङन्ताद् भेदस्यानवगमात्। प्रकर्षाभ्यावृत्त्यादयस्तु भेदनिबन्धना आश्रयप्रकर्षाभ्यावृत्त्यादिभेदनिमित्ता नैकत्वं क्रियायां विघ्नन्ति। नैतानीति। कर्तृकर्मसमवेतसंख्याभिधायिनी द्विवचनबहुवचने इत्यर्थः। ननु कर्तृकर्मणोर्लविधानादनेकस्मिन् कारके अनेकेनव लकारेणोत्पत्तव्यम्। भवत्वनेको लकारः लकारजातेरवधानाल्लस्त्येव लत्वाश्रयणादनेकस्यापि लस्य स्थाने अर्थतः आन्तर्याद् द्विवचन-

अनुवर्त्त्य अभिमतवाक्यार्थो यद्यपि लब्धुं शक्यते तथापि अश्व अश्व औ इति स्थिते विभक्त्यपेक्षाच्छेषात् पूर्वमन्तरङ्गत्वात् समासान्तोदात्ते कृते यदि पूर्वशेषस्तर्हि सर्वानुदात्तं पदं स्यात्। परशेषे तु अन्तोदात्तं स्यात्।

तदभाव इति। (कै)

विवक्षितार्थावगमायैकशेषो न कृत इति भावः। एवमेव "यत्तदेतेभ्य" इत्यादौ कोशेषु चैकशेषाकरणम्। तत्शब्द सूचिता स्वरसं स्पष्टयति

अर्थेति॥ (कै)

अर्थानवगतिरिति। (कै)

प्रकरणादिना प्रतीतिमभ्युपगम्येदमेतत्। एवं च विभक्त्यन्तानामेकशेषे तृतीयान्तादीनामेकशेषो भवत्येव। प्रथमा द्वितीययोस्तु नेतिमते दोषाभावात्। एकविभक्ताविति पदरहितप्रातिपदिकैकशेषपक्षे एवैष दोष इत्यर्थो भाष्यस्य विभक्तिपदाभावे सरूपाणा-

---

द्वौ च द्वौ च इत्यस्य चत्वार इत्यर्थः॥ नैतौस्तः परिहारौ। यत्तावदुच्यते संख्याया अर्थासंप्रत्ययादिति। अर्थासंप्रत्ययेऽप्येकशेषो भवति। तद्यथा। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ (१। २। ६५)। न चोच्यते वृद्धयुवानाविति

सहविवक्षायामिति। एवं चैकैकस्यानेकार्थाभिधानाद् द्विवचनबहुवचनान्तानामेवैकशेषः। न तर्हीति। नित्येनैकशेषेण भवितव्यमिति वाक्यं न प्राप्नोतीत्यर्थः। इतरो भिन्नार्थत्वाद् एकशेषवृत्त्या वाक्यं न बाध्यत इत्याह। नैतदिति। प्रत्येकमत्र विवक्षेत्यर्थः। बालास्तु प्रक्रियावाक्येनैव व्युत्पाद्यन्त इत्याह। अथापीति। यथाजातीयकानामिति। द्रव्यवाचिनामित्यर्थः। एकाहीति। आख्यातवाच्या क्रिया सर्वैवनिवृत्तभेदा प्रतीयते। भवद्भिरा-

---

इति स्यात्। तथा वृक्षा अनित्या इत्यादावन्तसुप्रत्ययश्रवणं स्यादिति दुष्ट एव प्रथमः पक्षः॥ द्वितीये वृक्षस् इति सविभक्तिकस्यावस्थानात्। द्विवचनबहुवचनयोरनुत्पत्तिरेकवचनश्रवणं च स्यात्॥ तृतीये द्वन्द्वे इति

कृदन्तत्वादिति। (कै)

अतिङीति प्रतिषेधस्तु तिङ एव स्थानिवत्त्वप्राप्त [1]कृतस्येति अभिमानः। भाष्ये

मातृमात्रोरिति। (भा)

प्रातिपदिकयोरनयोः सारूप्यादिति भावः। इदं मात्रादीनामुपलक्षणम् ॥

यावतैकशेषेणेति। (कै)

जनन्यादिवाचकयोर्निषेधेऽपि शब्दपरयोर्निषेधे मानाभाव इत्यर्थः ॥

---

१ कृतस्य। इ॥

संख्याया अर्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेषः। वा॥ संख्याया अर्थासंप्रत्ययादेकशेषो न भविष्यति। न ह्येकावित्यनेनार्थो गम्यते। अन्यपदार्थत्वाच्च संख्याया एकशेषो न भविष्यति। एकश्चैकश्चेत्यस्य द्वावित्यर्थः।

कस्मिंश्चित्कारके विवक्षिते तस्मिन्नन्यया विभक्त्या भाव्यमित्येकविभक्त्यन्तानां सरूपाणामेकशेषः सिध्यति। कश्चिदिति। अवस्थितस्य वचनस्य लोपो वक्तव्यः। तस्मिन्नपि कृते प्रत्ययलक्षणेन प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञाया अभावाद् द्विवचनबहुवचने न सिध्यत इति ते अपि वक्तव्ये। न ङिसंबुद्ध्योरिति तु ज्ञापकं न लोपविषयमेवापि त्वविशेषेण लुप्तप्रत्ययस्य प्रातिपदिकसंज्ञायां ज्ञापकम्। एवमप्येकार्थत्वाच्छिष्यमाणस्य द्विवचनबहुवचनासिद्धिरेव।

लोप इति व्याख्याने तु हल्ङ्यादिलोपः तत्रापि सुतिसीति प्रत्ययैः प्रकृतेराक्षेप इति पक्षे तु न कस्यचिल्लोपः। सर्वथापीष्टरूपं न सिध्यत्येव। आद्यन्तयोर्निवृत्तौ तुस् वृक्षस् इति स्यात्। परयोर्निवृत्तौ तु वृक्षस्

द्विवचनेति। (भा)

शिष्टस्य विभक्त्यन्ततयाऽप्रातिपदिकत्वेन द्विवचनाद्यप्राप्तेः (अप्राप्ते। क।) सापि (वाच्यः। इ।) वाच्येत्यर्थः॥ द्वितीयपक्षादिशेषं दर्शयितुमाह

एकेति॥ (कै)

प्रातिपदिकानामिति। (भा)

अनुवृत्तस्य बहुवचनेन विपरीणाम इत्यर्थः। यद्यपि विभक्त्युत्पत्तेः पूर्वं सरूपाणामेकशेष इत्यर्थे भाष्यतात्पर्य्येण प्रातिपदिकग्रहणानुवृत्तेः फलं चिन्त्यम्। तथापि हरित हरिणेत्याद्यग्रिमवार्त्तिकोत्थानाय तथोक्तम्॥

स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्यैकशेषो वक्तव्यः। अक्षश्चाक्षश्च अक्षौ (३। १। ३॥ ६। १। १६७)। मीमांसकश्च मीमांसकश्च मीमांसकौ (६। १। १६७)॥ इह कस्मान्न भवति। एकश्चैकश्च द्वौ च द्वौ चेति।

स्योपलक्षणार्थत्वाद् इगावकादीनामपि हरिणादीनामेकशेषो भवति। स्वरभिन्नानामिति वचनात् ङीबन्तस्य हरिणीशब्दस्य शेषः। येत्वाहुर्हरितहरिणयोरेवैकशेषे कृते उभयवाचित्वेऽप्यन्यतरस्य वर्णवाचित्वं जातिवाचित्वं वाश्रित्य स्त्रीप्रत्ययः क्रियत इति तेषां पक्षे स्वरभेदप्रसङ्गः। मातमातो स्तु क्व चित्साहृप्येऽप्यर्थ वप्रतिषेधादेकशेषाभावः। यत्र वेति। अनेनानैमित्तिकत्वमेव प्रतिपाद्यते। विभाग इति। कर्मादिकारकमिह विभक्तिशब्देनोच्यते तेन हि प्रातिपदिकार्थो विभागेनावस्थाप्यते। तत्र

एकशेषः। एकवचनान्तानां चाकृतद्वन्द्वानां वा समुदायादेकविभक्तौ वा युगपदधिकरणवचने वा अनैमित्तिको वेति षट्पक्षाः। तत्राद्ये एकशब्दः समानपर्य्यायस्तथा च वृक्षस् वृक्षस् इति स्थिते संयोगान्तस्य पदान्तस्य

विप्रतिषिद्धावेताविति । (भा)

कर्तृसंप्रदानयोरर्थयोर्विरोधेन युगपदेकरूपेणैकत्रान्वयाभावेन सहविवक्षाभावादेकशेषाप्राप्तेरेकत्वेन विभक्तिर्न विशेष्येत्यर्थः । कैयटोक्तं "ब्राह्मणेभ्य इत्युक्ते" इत्यादि तु वचनलोपवचनविधिकरणेऽपि एकग्रहणवैयर्थ्योपपादकमिति बोध्यम् ॥ भाष्ये

अनेकमर्थम् (भा)

इत्यस्य युगपदेकरूपेणेत्यादिः ॥

अयं तर्हीति (भा)

प्रतीके

एकविभक्त्यन्तानामिति

क्रियमाणे प्रत्युतदोष इति (कै)

व्याख्यानं भाष्याक्षरस्वरसविरुद्धम् उक्तदोषाभावेऽपि अयं दोष इत्यर्थस्तदक्षरमर्य्यादया लभ्यते ॥

एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डाविति वा ॥ स्वरभिन्नानां यस्योत्तरस्वरविधिः । वा ॥

भाष्यकार एनं पक्षं समर्थयितुमाह । अथातेनेति । विभक्तिः साम्येनेति । एकविभक्तिर्नैकशेषनिमित्तत्वेनेहोपात्ता किं तर्हि सारूप्योपलक्षणार्था एकविभक्तौ लौकिके प्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः स चानैमित्तिकत्वाद्विभक्तिं नापेक्षते भाष्ये प्रातिपदिकग्रहण-

---

माणे तु सूत्रे यद्यपि षट्पक्षाः सम्भवन्ति तथापि तत्र त्रयो दुष्टा एव । त्रयस्तु निर्दोषा इत्यवधेयम् । तथा हि । पृथक् सर्वेभ्यो विभक्तौ परत

न वेति। (भा)

प्रत्याख्यानमप्येकग्रहणस्यैव॥

एकविभक्त्यन्तानामिति [1]न वक्तव्यमेवेति। (कै)

"न वेति" प्रतीकेऽस्यार्थस्योपयोगश्चिन्त्यः। यदि पुनः "प्रातिपदिकानामिति" प्रतीके त्विदं वक्तुं युक्तं "अयं तर्हि दोषः" इत्यग्रिमभाष्यस्वारस्येन तावत्पर्यन्तं

विभक्त्यन्तानामेकशेष इति (भा)

पश्चानुवृत्तेरेव लाभेन तथा व्याख्यानस्यानौचित्याच्च॥

---

१ उपलब्धविवरणपुस्तके "एकविभक्त्यन्तानामिति न वक्तव्यमेवेति" इति प्रतीको दृश्यते। उपलब्ध कैयटपुस्तके तु "एकविभक्त्यन्तानामिति न कर्तव्यमेव" एवम्विधः पाठोऽस्ति॥

र्थानामेकशेषो भवतीति वक्तव्यम्॥ यदि समानार्थानामेकशेष उच्यते कथम् अक्षाः पादाः माषा इति। नानार्थानामपि सरूपाणाम्। वा॥ नानार्थानामपि सरूपाणामेकशेषो वक्तव्यः॥ एकार्थानामपि विरूपाणाम्। वा॥

त्वादिह नानुवर्तते। सारूप्यं चेहाश्रीयते। न च प्रातिपदिकानि लोके प्रयुज्यन्ते किं तर्हि पदान्येव। शास्त्रेऽपि प्रकृत्याद्युपदेशेनानुमेयत्वात् प्रातिपदिकानां प्रयोगाभावः। तेन पदावस्थायां मातृमातार इति वैरूप्यादेकशेषाभावः। हरिणाविन्यादौ तु भवतीति दोषप्रतिविधानं कृतम्। अपर आहेति। पश्चात्सम्भवप्रतिपादनार्थमिदमुक्तमित्यर्थः। इदानीं

वद्विनापि सहविवक्षामेकशेषं विधातुं भविष्यतीत्याशयेन "द्विर्वचनेऽचि"-(१।१।५९) त्यत्र एकशेष इति भाष्येऽभिहितमिति दिक्। आरभ्य-

कारकभेदादिति । (भा)

न हि तत्र द्वन्द्वप्राप्तिः सुबन्तानां तद्विधानात् । इदमवकाश-मात्रं न त्वेकशेषेणेष्टसिद्धिः । द्विवचनाद्यसिद्धेः ॥ भाष्ये

यदि पुनरिति । (भा)

चतुर्थः पक्षः । षष्ठ्यर्थे सप्तमीति भावः ॥ तदाह

षष्ठीनिर्देशे त्विति । (कै)

[1]षष्ठ्यर्थकत्वे च निर्देशे त्वित्यर्थः ॥ भाष्ये

एकविभक्त्यन्तानामिति त्विति । (भा)

एकग्रहणं कर्त्तव्यं भवतीत्यर्थः । प्रयोजनप्रश्ने तस्यैवोत्तरदानात् ॥

१ षष्ठ्यर्थकत्वेन । क ॥

तत्र (२। ४। ६४) गोत्रस्य ग्रहणं न चैतल्लौकिकं गोत्रम् ॥ अथवा पुनरस्त्वेका प्रकृतिर्बहुवचनस्य यञः । ननु चोक्तमसारूप्यादेकशेषो न प्राप्नोतीति । सिद्धं तु समानार्थानामेकशेषवचनात् । वा ॥ सिद्धमेतत् । कथम् । समाना-

तृतीयादौ विभक्तौ सारूप्यं तत्रैवैकशेषो न प्रथमाद्वितीययोरित्यर्थः । हरितेति । एषां प्रातिपदिकावस्थायां वैरूप्यमित्येकशेषो न प्राप्नोति विभक्तौ तु सारूप्यसद्भावात् सिध्यत्येकशेषः । हरितस्य स्त्रीति । नानेन पुंयोगः प्रतिपाद्यते तत्र हि ङीषा भाव्यं हरितीति किं तर्हि अयमर्थः हरितशब्दस्य हरिणी सा च स्त्री । न वेति । प्रातिपदिकग्रहणं विच्छिन्न-

प्रत्याख्यायतामिति वाच्यम् । प्रत्ययलक्षणेन तुगागमप्रातिपदिकसंज्ञाद्यर्थं तदारम्भात् । तदेवं सरूपाणां विरूपाणां च सर्वमेकशेषं प्रत्याचक्षाणेनापि भगवता सरूपसूत्रमात्रं तु शास्त्रीये व्यवहारे संज्ञापरिभाषादि-

च १"नङि मम्धयोः" इति ज्ञापकं च न लोपविषयमेवेत्यर्थः ॥

भाष्ये ज्ञापकस्य सामान्यापेक्षत्वेऽपि दोषमाह

द्वन्द्वप्रतिषेधश्चेति। (भा)

द्वन्द्वस्य वैकल्पिकत्वात्तदभावेऽस्य सार्थक्यं मन्यते ॥

अनवकाश इति। (भा)

सहविवक्षायां व्यपेक्षाभावे ह्येकशेषस्तत्र च द्वन्द्वस्य नित्यता विशेषणविशेष्यभावानापन्नस्यानेकस्य युगपदेकपदार्थसम्बन्धबोधनेच्छा सह विवक्षेति भावः ॥

---

१ अ ८। पा २ सू ८॥

इति। अश्चो बहुषु यश्चो बहुष्वित्युच्यमानो लुग्न प्राप्नोति। मा भूदेवम्। अत्रन्तं यद्बहुषु यत्रन्तं यद्बहुष्वित्येवं भविष्यति। ननु चोक्तं नैवं शक्यमिह हि दोषः स्यात् काश्यपप्रतिकृतयः काश्यपा इति। नैष दोषः। लौकिकस्य

भाष्यम्। एकशेषे सति विवक्षितार्थानवगमात् तदभावः। एवं ह्यत्रार्थो विवक्षितः जननीवाचिनः परिच्छेदवाचिनश्च मातृशब्दस्यैकशेषप्रतिषेधो वक्तव्य इति। एष चार्थो मात्रोरित्युक्ते न गम्यते। अथ मतमेतदिति। अर्थविप्रतिषेधादत्रैकशेषो न भवति। कृते ह्येकशेषे ताभिरित्यनुप्रयोगे पुमर्थो न प्रतीयते तैरिति चोक्ते स्त्र्यर्थानवगतिः। अभ्युपगम्यवादेन त्वेतदुच्यते विभक्त्यन्तानां सारूप्य इति। प्रातिपदिकावस्थायां सर्वदा सारूप्यात् सर्वत्रैकशेषः स्यात् विभक्त्यन्तानां तु सरूपाणामेकशेषे यत्रैव

द्विवचनाद्युपाधिविशेषपुरस्कारेण पित्रादिशब्दानामेव मात्रादौ शक्ति-र्निरूढलक्षणा चेति फलितोऽर्थः। तथा च लोकव्यवहारादेव तद्ग्रह-सम्भवे न किंचिदनुपपन्नम्। न चैवमग्निविदित्यादौ क्विबादयोऽपि

तदर्थम् (भा)

तदवतारणार्थम् ॥

पुनश्चोच्यते इति। (भा)

असमासे वचनलोप इत्येतदित्यर्थः ॥ वक्ष्यतीति यदुक्तं तदाह

द्विवचनेति। (भा)

केवलं योः श्रवणमेव न दोषोऽपि तु द्विवचनाद्यसिद्धिरपि वचनाद्विभक्तिलोपे कृतेऽपि [1]प्रत्ययलक्षणेनाप्रत्यय इति निषेधात् प्रातिपदिकत्वाभावेन द्विवचनाद्यनापत्तेः। तदर्थं वचनारम्भे गौरवं

१ अ १। पा १। सू ६२ ॥ प्रत्यय इति निषेधात्। इ ॥

चैकशेषे सिद्धम्। अपत्यादिष्वित्युच्यते बहवश्चापत्यादयः। गर्गस्यापत्यं बहवो गर्गाः (४।१।१०५॥२।४।६४)। एका प्रकृतिर्बहवश्च यञः। असारूप्यादेकशेषो न प्राप्नोति। ननु च यथैव बहवो यञ एवं प्रकृतयोऽपि बह्व्यः स्युः। नैवं शक्यम्। इह हि दोषः स्यात्। गर्गाः वत्साः विदाः उर्वा

एकविभक्त्यन्तानामिति तु क्रियमाणे प्रत्युत दोषः। कश्चिदिति। भा। श्रिय्य-माणस्यैकवचनस्य लोपो वक्तव्यः। यदि पुनरिति। भा। एकविभक्ताविति न क्रियते "ह्रस्वो नपुंसक" इत्यतः प्रातिपदिकग्रहणमनुवर्त्यानुत्पन्नायामेव विभक्तौ सरूपाणां प्रातिपादिकानामेकशेषः क्रियते। तिङन्तेषु कथम्। उच्यते। लावस्थायामेव पच् ल पच् ल् इति स्थिते कृदन्तत्वात् प्राति-पदिकत्वे सत्येकशेषः। मातृमात्रोरिति। भा। कथमयं निर्देशः यावतैकशेषेण

भगवता एकशेषप्रकरणम् प्रत्याख्यातम्। न चैवं पितराविव्यत्र मातुः श्वशुरावित्यादौ श्वश्र्वादेश्च प्रतीतिः कथं स्यादिति वाच्यम्। एकशेषारम्भे-ऽपि तौल्यात्। यः शिष्यते स लुप्यमानार्थाभिधायीति चेत् तर्हि

प्रतिषेधश्चेति । (भा)

प्रतिषेधोऽत्र लोपः । उपलक्षणमिदं पादौ पादा इत्यादावेकवद्भावस्यापि प्रसङ्ग इत्यपि बोध्यम् ॥

पुनरुपन्यास इति । (कै)

द्वितीयपक्षस्येति शेषः । उत्पततैव तत्पक्षदूषणमुपक्रमतैव पृथग् विभक्त्युपलब्धिस्तदाश्रयत्वादित्यनेन "चोदिताः स्म" इति अर्थः ॥ दूषणान्तरं वक्तुमुक्तानुवाद इत्याह

द्विवचनेत्यादि ॥ (भा)

वक्ष्यतीति । (भा)

वार्त्तिककृदिति शेषः ॥

नियमार्थमिति । नैष दोषः । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यथा जातीयकानां समासः । कथं जातीयकानां समासः । सुबन्तानाम् ॥ सर्वत्रापत्यादिषूपसंख्यानम् । वा ॥ सर्वेषु पक्षेष्वपत्यादिषूपसंख्यानं कर्त्तव्यम् । भिक्षाणां समूहो भैक्षमिति (४ । २ । ३८) ॥ सर्वत्रेत्युच्यते प्रातिपदिकानां

मुक्तमेव कश्चिद्वचनलोपः परिहृत इति । न वेति । भा । एकविभक्त्यन्तानामिति न कर्त्तव्यमेव प्रयोजनाभावात् ततश्चानुत्पन्नायामेव विभक्तौ प्रातिपदिकानामेकशेषे कृते शिष्यमाणस्य निवर्तमानार्थाभिधानाद्द्विवचनबहुवचनसिद्धिः । विप्रतिषिद्धाविति । भा । चतुर्थ्यन्तस्य शेषे ब्राह्मणेभ्य इत्युक्ते च कर्तृत्वं न प्रतीयते । तृतीयान्तस्य शेषे ब्राह्मणैरित्युक्ते संप्रदानत्वं न गम्यते यस्य शब्दोऽनेकार्थप्रत्यायनाय प्रभवति स शिष्यते नान्यः । अयं तर्हीति । भा ।

इष्ट एवेति दिक् । एवं स्थिते सूत्रारम्भपक्षेऽपि बहुशोऽनभिधानस्यैवाश्रयणाद् घटघटा इत्यादावपि तथैवास्तु किं तन्निरासार्थं सूत्रारम्भेण इत्याशयेन

समास एकशेषे इति। (कै)

प्रत्यर्थशब्दनिवेशे एक पचा एकाक्रियोच्यते एकेन च तिपैक: कर्त्तेति अनेकक्रियाकर्तृविवक्षायामनेकतिङन्तप्रसङ्गे एकशेष इष्यते स च तेषां समासाभावात् ॥

न प्राप्नोतीति। (कै)

सरूपतिङन्तानामपि द्वन्द्वो वाच्य इत्यर्थः॥ आद्ययोस्तिङो- र्लोपेऽपि समासस्याधातुत्वात् ततस्तिङोऽप्राप्तेराह भाष्ये

तिङ्विधिरिति॥ (भा)

सुप् ग्रहणात्तिङो लुगप्राप्तेराह

क्रियापेक्षाणि। किं तर्हि। साधनापेक्षाणि। अथवा पुनरस्त्वेक- विभक्ताविति। ननु चोक्तमेकविभक्ताविति चेन्नाभावाद्विभक्तेरिति। नैष दोषः। परिहृतमेतत्। अर्थवत् प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्य- तीति। ननु चोक्तं नियमान्न प्राप्नोति। अर्थवत् समुदायानां समासग्रहणं

कारकभेदात् क्रियाभेदादनेकतिङन्तप्रसङ्गे एकशेषो विधेयः। ततश्च परत्वात् सरूपाणामेकशेषं बाधित्वा द्वन्द्वः प्राप्नोति सकृद्गतौ विप्रतिषेध इति पुनरेकशेषो न प्राप्नोति सत्यपि वा पुनः प्रसङ्गविज्ञाने स्वरसमासा- न्तेषु दोष एव। यदि पुनरिति। भा। सप्तमीनिर्देशे प्रकृतिमात्रनिवृत्तौ प्रत्ययश्रवणप्रसङ्गः षष्ठीनिर्देशे तु विभक्त्यन्तानां निवृत्त्या भाव्यमिति नास्ति केवलविभक्तिश्रवणप्रसङ्गः। कस्मिन्निति। भा। शिष्यमाणस्य त्वेकवचनश्रवण- प्रसङ्ग एव। एकविभक्त्यन्तानामिति। भा। सप्तमीनिर्देशमपास्य तु प्रयोजन-

---

एकस्य एकस्य द्वौ च द्वौ च इत्यादौ तु द्वन्द्वैकशेषौ उभावपि अनभिधानेनैव वारणीयौ। उत्सर्गतः सङ्ख्याशब्देऽप्येवमेवेति बोध्यम्। विंशतीत्यादौ त्वेकशेष

वचनसामर्थ्यादिति। (कै)

लुकालुप्तत्वादिति भावः[1] ॥

अथापीति। (कै)

द्वन्द्वे सुप् लुकि श्रोत्तरपदिकानङि ततो विभक्तौ "ऋतो ङि" (७।३।११०) इति गुणे "अप्तृन्" (६।४।११) इति दीर्घे च परत्वात् कृते इति भावः। एकवचनान्तेन विग्रहे तु समासविभक्तावेव वैरूप्यम्। अन्तर्वर्त्तिन्यां तु नेति तात्पर्य्यम् ॥

१ अथापीतीत्यारभ्य इति भाव इत्यन्तं नास्ति क पुस्तके ॥

तथा जातीयकानामेकशेषः। न च तिङन्तानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति। किं कारणम्। एका हि क्रिया। एकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति। यदि तर्ह्येका क्रिया द्विवचनबहुवचनानि न सिध्यन्ति। पचतः पचन्ति। नैतानि

लुप्तायामपि वचनसामर्थ्यात् प्रत्ययलक्षणमाश्रीयते तदात्र वैरूप्यमथापि समासविभक्त्यैकविभक्तिपरत्वं तथापि वैरूप्यं तिङ्समास इति। समास एकशेषे विधीयमाने तिङ्समासेऽप्येकशेषो वक्तव्यः। स च तिङ्समासो वक्तव्य इत्यर्थः। एकमिति। भा। विनापि तेनार्थस्यावगमात्। प्रकृत इति। भा। आख्यातमाख्यातेनेत्यत्र द्वन्द्वस्य सरूपाणामिति वक्तव्यम्। यदि पुनरिति। भा। दोषान्तराभिधानाय पुनरुपन्यासः। तदर्थमिति। भा। पूर्वं दोषमात्रमुपन्यस्तं केवलाया विभक्तेः श्रवणं प्राप्नोतीति। इदानीं तु तत्प्रतिविधानाय वचने क्रियमाणे गौरवमापद्यत इत्येतत्प्रतिपाद्यते तिङन्तान्यवकाश इति

सकलव्यक्तिसंग्रहो भविष्यतीति प्रतिव्यक्ति लक्षणं नावर्त्तनीयम्। एकवचास्यान्यतरस्यामिति ज्ञापकादेकशेषे कृते एकवद्भावो नेति तु तत्त्वम्।

[1]भाष्यकारस्य मतमिति। (कै)

एवं विधं भाष्यं न दृश्यत इति चिन्त्यमिदम्। न चेदं भाष्यमेव तथान्यथैकस्यार्थवत्त्वेनापरस्यानर्थकत्वेन कथमेकशेष इति वाच्यम्। द्वन्द्वान्तर्गतानामर्थवतामेवैकशेष इत्यर्थे मानाभावात्। विशिष्टरूपोपादानविषयायाः अर्थवत् परिभाषाया इहाप्राप्तेः॥

सर्वथेति। (कै)

समासविभक्त्यन्तर्वर्त्तिविभक्तौ चेत्यर्थः॥ तदेवाह

यद्यन्तरिति। (कै)

न च विग्रहप्रदर्शनेन स्पष्टमेवोक्तम्॥

१ भाष्यकारस्य दर्शनमित्युपलब्धकैयटेऽन्ति॥

वृत्ता इति॥ यदप्युच्यते द्वन्द्वप्रतिषेधस्य वक्तव्य इति। नैष दोषः। अनवकाश एकशेषो द्वन्द्वं बाधिष्यते। ननु चोक्तं सावकाश एकशेषः। कोऽवकाशः तिङन्तान्यवकाश इति। न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति। किं कारणम्। यथा जातीयकानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति

न स्यात्। समासार्थस्योत्तरपदस्यान्तः समासान्त इत्यपि भाष्यकारस्य दर्शनमिति अक्षशब्दयोर्वैरूप्यमाश्रित्य भाष्यकृता दोष उद्भावितः। अक्षाश्रये चेति। चशब्दादनक्षाश्रयेऽपि। यथा नौश्च नावौ चेति। स्वसा च स्वसारौ चेति। किमर्थमेकमेकवचनान्तं द्वितीयं तु द्विवचनान्तमिति चेत् सर्वथा वैरूप्यप्रतिपादनाय। तथा हि। यद्यन्तर्वतिन्यां विभक्तौ

तत्राप्येकशेषप्रवृत्तिः। न चैवं नपुंसकतापत्तिः। समाहारद्वन्द्व एव तदनुशासनात्। तथा च प्रत्यर्थं शब्दनिवेश इति पक्षे न ब्राह्मणं हन्यादित्यादौ

असारूप्यादिति। (भा)

समासान्तप्राग्भागस्य विभक्तिपरत्वाभावः। तद्विशिष्टस्य तु न सरूपत्वम् ॥

एकशेषो न स्यादिति। (कै)

किं चैकशेषमत्यपि ऋचावित्यस्यासिद्धिरिव। ऋचे इत्येवमापत्तेः। ऋग् ऋच्शब्दयोरेकशेषे तु पक्षे तत् सिद्धिरस्ति इति बोध्यम् ॥

उत्तरपदस्यान्तादिति। (कै)

अयं पक्षस्तु निर्मूल एवेति पञ्चमषष्ठयोर्वक्ष्यामः। "गोस्त्रियोः" (१।२।४८) इत्यत्रोक्तं च ॥

वचनविधिरिति। सहविवक्षायामेकशेषः। युगपद्विवक्षायामेकशेषेण भवितव्यम्। न तर्हीदानीमिदं भवति वृक्षश्च वृक्षश्च वृक्षौ वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। नैतत्सहविवक्षायां भवति। अथापि निदर्शयितुं बुद्धिरेवं निदर्शयितव्यम्। वृक्षौ च वृक्षौ च वृक्षौ। वृक्षाश्च वृक्षाश्च वृक्षाश्च

बाधको भवति। कृते च समासान्तोदात्तत्वे एकशेषस्य प्रवर्त्तनाद्विरोधाभावाच्च नास्त्युत्सर्गापवादभावः। ऋक् चेति। भा। ऋच् ऋच् अ इति स्थिते अन्तर्वर्तिन्या विभक्तेर्लुकालुप्तत्वात् प्रत्ययलक्षणप्रतिषेधान्नास्त्येकविभक्तिपरतेति एकशेषनिमित्तं समुदायाद्विभक्तिरुत्पाद्या तस्यां च नास्ति सारूप्यं एको हि ऋक्शब्दः अपर ऋचशब्दः समासान्तः। समासस्यैवावयवो नोत्तरपदस्येति चेत्तर्हि तेनैव व्यवधानात् समासविभक्तेरेकशेषो

चैवं समाहारद्वन्द्वविषये एकशेषानुशासनात् पाक्षिकं घटघटमित्यादिदुर्वारमेवेति वाच्यम्। तत्रानभिधानस्यैव शरणी करणीयत्वात्। अस्तु वा

अथवेति ॥ (कै)

समासान्तोदात्तत्वे च कृते इति । (कै)

विभक्तिसापेक्षैकशेषापेक्षयान्तरङ्गत्वादिति भावः ॥

प्रसङ्ग इति । (कै)

दृश्यते त्वाद्युदात्तत्वमिति भावः । अश्वशब्दस्य क्वनन्तत्वात् । परत्वादित्यस्य उत्कृष्टत्वात् पूर्वकालप्राप्तत्वादित्यर्थः । एकशेषस्तु समासाद्विभक्त्युत्पत्त्युत्तरमिति भावः । एवमपेऽपि । एवं चापवादत्वाशङ्कापि चिन्त्यैव । ब्राह्मणेभ्यो दधि इत्यादावविरोधेऽपि दधिदानतः पूर्वं परत्र वा मावकाशत्वेऽपि [1]बाधदर्शनात् समाधिरपि चिन्त्यः ॥ भाष्ये

[1] बाधकत्व- । क ॥

मेतत् । न हि । कथमनुच्यमानं गंस्यते । एतदप्येतेनैवाभिहितं सूत्रेण सरूपाणामेकशेष एकविभक्तौ इति । कथम् । नेदं पारिभाषिक्या विभक्तेर्ग्रहणम् (१ । ४ । १०४) । किं तर्हि । वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति । नैष दोषः । यत्तावदुच्यते कश्चिद्वचनलोपो द्विवचनबहु-

कृतैकशेषाणां वा पुनरेकशेषे क्रियमाणे द्विवचनबहुवचनश्रवणप्रसङ्गः । कश्चिद्वचनलोप इति । यस्त्वया कश्चिद्वचनलोप उक्तः स परिहृतः । अथ वा सुपां परिहृतो न तिङामित्यर्थः । स्वरसमासान्तेष्विति । भा । समासे कृते समासान्तोदात्तत्वे च यदि पूर्वशेषस्तदा सर्वानुदात्तत्वं प्राप्नोत्यथ परशेषस्तदाश्वशब्दस्यान्तोदात्तत्वप्रसङ्गः । परत्वादिति । भा । ननु प्राप्ते समासान्तोदात्तत्वे आरभ्यमाण एकशेषस्तस्य बाधकः । नैतदस्ति । निरवकाशो हि

न तु सौत्र एकशेषः । सह विवक्षा विरहात् । सारव इत्यत्रापि तथा स्यादिति चेत् पक्षे एवमेव । तवतापि उभयप्रयोगस्य निर्वाह्यत्वात् । न

यदि पुनः समासेति। (भा)

द्वन्द्वे इत्यनुवर्त्त्य तत्र कृते इति व्याख्यानात्तस्य निमित्ततया नासौ द्वन्द्वबाधकः। द्वन्द्वे कृते एकविभक्तौ परतः सरूपाणामेकशेषः इत्यर्थः। अत्र पक्षे संख्या वाच्यैवैकशब्दः॥ समासान्तर्गत सर्व वचनलोपात् कश्चिदि·त्ययुक्तमत आह

यस्त्वयेति। (कै)

यस्त्वया वचनलोपासिद्धिरूपः कश्चिद् दोष उक्तः स परिहृत इत्यर्थ इति भावः॥ अत्राध्याहारगौरवमाशङ्क्याह

प्रातिपदिकानां प्रयोगो नास्ति॥ अथानेन पक्षेणार्थः स्यात् प्रातिपदिकानामेकशेष इति। बाढ़मर्थः। किं वक्तव्यमेतत्। न हि। कथम् अनुच्यमानं गंस्यते। एतेनैवाभिहितं सूत्रेण सरूपाणामेकशेष एकविभक्तौ इति। कथम्। विभक्तिः सारूप्येणाश्रीयते। अनैमित्तिक एकशेषः। एकविभक्तौ यानि सरूपाणि तेषामेकशेषो भवति। क्व। यत्र वा तत्र वेति॥ अथानेन पक्षेणार्थः स्याद्विभक्त्यन्तानामेकशेष इति। बाढ़मर्थः। किं वक्तव्य·

संयोगश्चासौ प्रत्येकं हलां संयोगसंज्ञेति पक्षाश्रये, आदिस्थ वृक्षशब्दापेक्षया तस्य लोपो "हलङ्याबि"त्यनेनेत्यर्थः। अवरत इति। भा। स वृक्षसित प्राप्नोति। दुष्टत्वप्रतिपादनपरं चैतत् न पुनः कदाचित्त्रयाणां श्रवणप्रतिपादनार्थः। द्विवचनबहुवचनयोरिति। भा। ये स्वभावादेव द्विवचनबहुवचनान्ताः प्रयुज्यन्ते गोदौ दाराः सिकता इत्यादयः। तत्र द्विवचनबहुवचनेषु परत एकशेषे सति द्विवचनबहुवचनानां अवणप्रसङ्गः।

इति श्रीहर्षप्रयोगोऽपि व्याख्यातः। सरस्यां भवाः सारवाः। ते च ते सारवसहितास्चेति कर्मधारये सह विवक्षा विरहात्। "विद्वन्मानस राजहंस" इत्यादिश्लिष्टरूपके तु मानसमेव मानसमिति तन्त्रेण प्रयोगो

द्विर्वचने भाष्यकृता वक्ष्यमाण पचसि पचतीत्यादेः समुदायस्य पदत्ववदिहापि वृक्षस्स् इति समुदायस्य पदत्वं वृक्षशब्दे तत्प्रत्यभिज्ञानात् । अन्त्यसकारे सुप्त्वाच्च । ईदृशे विषये संयोगादिलोप संयोगान्तलोपयोरविशेषेण भाष्ये संयोगान्तलोप उक्तः । हल्ङ्यादिलोपस्तु हलन्तप्रकृतेः पर इत्यर्थाच्चेत्याशयः । प्रत्येकं संयोगसंज्ञा इति पक्षे झल्परसंयोगादित्वेन संयोगादिलोपो भाष्योक्तः साधुरेव तत्र सूत्रे सङ्गीत्यनाश्रित्य चेदं प्रकारान्तरेणास्य दूषयिष्यमाणत्वाच्च तदनाश्रयणं तस्य प्रत्याख्यानाच्चेत्याहुः ॥ नन्वेकशेषं विना कथं द्विवचनादेः सम्भवोऽत आह

स्वभावत इति ॥ (कै)

कृतैकशेषाणां चेति । (कै)

इदं च हलन्ताभिप्रायं तत्र हि हल्ङ्यादिलोपे प्रत्ययलक्षणेन विभक्तिपरतयैकशेषे द्विवचनादौ पुनरेकशेष इत्यर्थः ॥ भाष्ये

न वैष पक्ष एवास्ति प्रातिपदिकानामेकशेष इति । किं कारणम् । पदस्यार्थे प्रयोगात् पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम् । रूपं चेहाश्रीयते रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकम् प्रयोगम् । तस्मिंश्च लौकिके प्रयोगे

संयोगादिलोपस्तेन माव्यम् । "पूर्वत्रासिद्धमि"ति वचना"द्धल्ङ्यादि"लोपेनैव च भाव्यम् । अत्र व्याचक्षते । संयोगस्य योन्तः सकारस्तस्य लोपः स च "हल्ङ्याब्भ्य" इत्यनेनेति । संयोगादिलोपेनेति । भा । अत्राप्येकपदस्य संयोगस्यादिर्नास्तीति हल्ङ्यादिलोपमेव संयोगादिलोपं प्रतिपन्नाः ।

व्याख्यायतामिति वाच्यम् । स्वरसमासान्तादि दोषप्रसङ्गेन कृतद्वन्द्वानामेकशेष इति पक्षस्य दूषयिष्यमाणत्वात् । एतेन "सारव सारवोर्मिज"

नन्विति। (कै)

संयोगान्तस्य पदस्य इति पाठः। "संयोगान्तस्य पदान्तस्य" इति तु व्याख्यानमसङ्गतमेव [1]"घ्वसोः" इति सूत्रे "द्विशकारको निर्देश" इति भाष्यविरोधात्। संयोगसंज्ञासूत्रेऽन्तपदसामर्थ्येन द्विवचनान्तेन समास इति ध्वनयता भाष्यकृता प्रयोजनान्तराभावस्य ध्वनितत्वेन तादृशेऽर्थे मानाभावाच्च॥ दोषान्तरमप्याह

संयोगान्तलोपस्य चेति॥ (भ)

हल्ङ्याभ्य (कै)

इति च तत्र[2] सुति सिति प्रत्ययैः प्रकृत्याक्षेपात् तस्याप्यप्राप्तिः तदाक्षेपे मानाभावात् फलाभावाच्चेत्यभिप्रायः॥ केचित्तु आष्टमिकपद-

१ अ ६। पा ४। सू ११९॥ २ न च तत्र। इ॥

रोक्षिणौ॥ न वा पदस्यार्थे प्रयोगात्। वा॥ न वैष दोषः। किं कारणम्। पदस्यार्थे प्रयोगात्। पदमर्थे प्रयुज्यते विभक्त्यन्तं च पदम्। रूपं चेहाश्रीयते रूपनिर्ग्रहश्च शब्दस्य नान्तरेण लौकिकं प्रयोगम्। तस्मिंश्च लौकिके प्रयोगे सरूपाण्येतानि॥ अपर आह न वा पदस्यार्थे प्रयोगात्।

प्रकृतिनिवृत्तेः केवलानां विभक्तीनां प्रयोगप्रसङ्ग इत्यर्थः। संयोगान्तलोपेनेति। भा। वृक्ष स् स् स् इति स्थिते संयोगान्तलोपो भविष्यति। ननु संयोगान्तस्य पदस्य लोप उच्यते तत्र पूर्वपदं सकारान्तं द्वौ सकारौ पदे इति पदत्रयं संपद्यत इति कुतो लोपः। संयोगान्तलोपस्य चापवादः

इत्यादि सूत्रेषु सहयोगे तृतीयायाः प्रयोगाच्च। यद्वा। पूर्वसूत्रात्द्वन्द्वे इत्यनुवर्त्तते। अर्थाधिकाराच्चेतरेतरयोगद्वन्द्वावगमः। तेन द्वन्द्वे प्रसक्ते सतीति व्याख्यानात् उक्तविषयनियमसिद्धिः। न च द्वन्द्वे कृत इत्येव

तदाश्रयत्वादिति । (भा)

बह्वर्थीहेस्तु विभक्त्याश्रयत्वात् तत्प्रकृत्येकशेषस्येत्यर्थः ॥

न केवला (भा)

इत्यस्य च अनुत्पन्नप्रत्यया प्रकृतिः प्रकृतेरनुत्पन्नश्च प्रत्ययो न प्रयोक्तव्य इति तात्पर्य्यमिति भावः ॥

अधुनेति । (भा)

यदेदमोधुना प्रत्यय इशोल्लोपश्च तदेदं निमित्तापायपरिभाषा नास्त्येव इत्यन्यत्र प्रपञ्चितम् ॥

संयोगान्तेति । (भा)

एवं[1] च निवर्त्तमानवृत्तशब्दसम्बन्धिविभक्तिश्रवणप्रसङ्गरूपो दोषो वारित इति भावः ॥

---

१ एवं वर्त्तमान- । इ ॥

हरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानं कर्त्तव्यम् । हरितस्य स्त्री हरिणी । हरिणस्यापि हरिणी । हरिणी च हरिणी च हरिण्यौ । श्येतस्य स्त्री श्येनी । श्येनस्यापि श्येनी । श्येनी च श्येनी च श्येन्यौ । रोहितस्य स्त्री रोहिणी रोहिणस्यापि रोहिणी । रोहिणी च रोहिणी च

पदिकमिति स्याद्युत्पत्तिरविरुद्धा । अर्थवत् समुदायानामिति । भा । अविशेषेण नियमो न तु सुबन्तानामेवेति मन्यते । इदानीं तुल्यपर्यायमेकशब्दमाश्रित्याह । पृथक् सर्वेषामिति । भा । वृक्षस् वृक्षस् वृक्षस् इति स्थिते विभक्तौ परतो यानि सरूपाणि तेषामेकशेष उच्यमाने विभक्तिनिमित्तत्वात्

भिन्नानामेका प्रख्योपजायते । यदा सहविवक्षान्तामाऊर्द्वन्द्वैकशेषयोः" इति । अयञ्च विषयनियमोऽभिधानबलाल्लभ्यते ॥ "वृद्धो यूना" (१ । २ । ६५)

तुल्येति। (कै)

यथा "एकदिग्" इत्यादौ प्रसिद्धतरार्थानुपपत्तौ प्रसिद्धार्थपरिग्रहो न्याय्य इति भावः। तुल्यत्वं भेदाधिष्ठानं तेन पृथक्सर्वेभ्यः शब्दतोऽर्थतश्च। तुल्यायां विभक्तौ परतः एकशेष इति तात्पर्य्यम्॥ अर्थतश्च इत्युक्ते प्रथमा द्वितीया द्विवचनान्तानां नैकशेषः। विनिगमनाविरहादर्थतश्चेत्यस्य लाभः। तदाह

वृक्षस् (कै)

इत्यादि॥

केवलानामिति। (कै)

निवृत्तप्रकृतीनामित्यादिः॥ भाष्ये

वक्तव्यः स्यात्। तस्यापि ह्येतानि क्वचिद्विभक्त्यन्तानि सरूपाणि। मातृभ्यां च मातृभ्यां चेति। अथ मतमेतद्विभक्त्यन्तानां सारूप्ये भवितव्यमेवैकशेषेणेति प्रातिपदिकानामेवैकशेषे दोषो भवति। एवं च कृत्वा चोद्यते। हरितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम्। वा॥ हरित-

---

तममि"ति द्वयोर्बहूनां वेप्सिततमस्य कर्म संज्ञा प्रवर्तते तत्र नान्तरीयकं संख्याया उपादानमिति लक्ष्यसिद्ध्यर्थमाश्रीयते। ननु चेति। भा। अवयवार्थातिरेकेन परस्परापेक्षायां सत्यां समुदायार्थोपजननात् सरूपसमुदायाभिनिवेशिन्येका प्रातिपदिकसंज्ञास्ति तथा सरूपसमुदाय एकं प्राति-

---

विवक्षायामेव एकशेषः। इतरेतरयोगद्वन्द्वस्य विषये इति यावत्। यत्र ह्यनेकस्यार्थस्य मिलितस्येतरान्वयः स तथाभूतो विषयः। उक्तं च* "अनुस्यूतेव

---

* अनुद्भूते च भेदानामेका प्रख्योपजायते।
यदा सहविवक्षा तामाहुर्द्वन्द्वैकशेषयोः॥ इति पाठोऽपि दृश्यते॥

समुदायस्य प्रातिपदिकत्वाभावादिति भाष्ये उक्तप्रातिपदिकत्व-पर्य्याप्त्यधिकरणात् प्रत्यय इति सूत्रार्थः। न हि प्रातिपदिक-समुदाये प्रातिपदिकत्वम्। यथा जनपदसमुदाये न जनपदत्व-मिति कैयटोक्तार्थोपयोगस्त्विन्त्यः। परस्परापेक्षायां कार्य्यविशेष इति शेषः॥ समुदायार्थः समूहरूपः॥

समुदाय इति। (कै)

समुदायोऽपीत्यर्थः॥

न तु सुबन्तानामिति। (कै)

भेदसंसर्गद्वारकार्थवतामुपलक्षणमिदम्॥

शेषे मातृमात्रोः प्रतिषेधः सरूपत्वात्। वा॥ प्रातिपदिकानामेकशेषे मातृ-मात्रोः प्रतिषेधो वक्तव्यः। माता च जनयित्री मातारौ च धान्यस्य मातृमातारः। किं कारणम्। सरूपत्वात्। सरूपाणि ह्येतानि प्राति-पदिकानि॥ किमुच्यते प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधो वक्तव्य इति न पुनर्यस्यापि विभक्त्यन्तानामेकशेषस्तेनापि मातृमात्रोः प्रतिषेधो

मिति। भा। संख्यावाचित्वेनैकशब्दस्य प्रसिद्धतरत्वात्। नाभावादिति। भा। "ङ्याप्प्रातिपदिकादि"त्यत्रैकवचनान्तानामेव द्वन्द्वः क्रियते। वर्ति-पदार्थानां सर्वत्र संख्याभेदावगमे प्रमाणाभावात्। गुणे च संख्याविवक्ष्यते यथा पशुना यजेतेति। एवं चैकैकस्मात् प्रातिपदिकात् स्वादिभिरुत्पत्तव्यं न तु समुदायात्। यत्र क्वचिद्गुणेऽपि संख्या न विवक्ष्यते यथा "कर्तुरीप्सित-

---

मित्तिकत्वात्। अथ वक्ष्यमाणरीत्या एकशेषविशेषणतां ब्रूषे तथाप्य-निस्तारः। देवदेव इत्यत्रापि षष्ठी समासादुपरि एकविभक्तेः सत्त्वात्। अन्तर्वर्त्तिन्योस्तु लुकालुप्तत्वेन प्रत्ययलक्षणाभावात्। अत्राहुः। सह

इत्यर्थः। किमिति प्रश्न इति भावः॥ प्रष्टुराशयं विज्ञातुमाहेतरो भाष्ये "एवमि"त्यादि॥ प्रष्टा स्वाशयमाह "एके"त्यादि॥ "संख्याभेदावगमे" द्वित्वाद्यवगमे इत्यर्थः। एवमपि प्रातिपदिकादित्येकत्वस्य विवक्षायां न मानमत आह

गुणे चेति। (कै)

संस्कार्य्यत्वादिति भावः॥

यथा कर्त्तुरिति। (कै)

कर्त्तुरित्यत्रेति भावः॥

लक्ष्यसिद्ध्यर्थमिति। (कै)

एवं च पशुना इत्यादिदृष्टान्तदानमभ्युच्चयो विधेयगता संख्या विवक्षिता नानुवाद्यगतेत्येव मीमांसकमर्य्यादेति भावः॥ वस्तु तस्तु

षिद्धत्वाद्युगपद्वचनं न भविष्यति॥ अनेकार्थाश्रयस्य पुनरेकशेषः। वा॥ अनेकमर्थं सम्प्रत्याययिष्यामीत्येकशेष आरभ्यते। तस्मान्नैकशब्दत्वम्। वा॥ तस्मादेकशब्दत्वं न भविष्यति॥ अयं तर्हि दोषः। कश्चिद्वचनलोपो द्विवचनबहुवचनविधिर्द्वन्द्वप्रतिषेधश्चेति॥ यदि पुनः प्रातिपदिकानामेकशेष उच्यते। किं कृतं भविष्यति। वचनलोपः परिहृतो भवति॥ प्रातिपदिकानामेक-

---

विषयभेदाद् बुद्धिगौरवापत्तिरित्यर्थः। सुकरतरकं चेति। भा। एवं हि प्रकरणमभिन्नरूपं भवति "वृद्धो यूने"त्यादिभिः सूत्रैरेकशेषस्य विधानात्। अनेकशेषारम्भे त्विह पृथक् प्रस्थानतया गौरवं स्यादित्यर्थः। किं पुनरिति। भा। किमयमेकशब्दः संख्यावाची तुल्यतावाची वेति प्रश्नः। एवं भवितु-

---

त्यादि सिद्धिस्तु स्यादेवैतद् विनापि हि"। जातिपक्षे व्यक्तिपक्षेऽपीति निष्कर्षसंग्रहः। स्यादेतत्। देव देव इत्यादावपि तर्ह्येकशेषः प्राप्नोति। न चैकविभक्ताविस्यनेन तद्वारणम्। तस्य सारूप्योपलक्षणत्वादेकशेषस्य चाने-

यदा तु द्वयोरिति। (कै)

सरूपौ च सरूपाश्च इत्येकशेषेण निर्देशादिति भावः। एवं चावरतोद्वयोरिति भाष्यं यत्र बहूनामेकशेषस्तद्विषयमेवेति तात्पर्य्यम्॥ नन्वेकशेषारम्भस्य गुरुत्वेन सुकरत्वमेव नास्ति कुतः सुकरतरत्वमित्यत (सुकरतरत्वम्। इ। क।) आह

एवं हीति। (कै)

[1]पृथक् प्रकरणतया [2]"वृद्धो यूना" इत्याद्यर्थं चैकशेषावश्यं वाच्यम् इति भावः॥

संख्येति। (कै)

"तेनैकदिग्" (४।३।११२) इति वत् समानवाचित्वे पृथक् सर्वेभ्यः उत्पन्नाया विभक्तेर्निमित्तत्वलाभाद्वार्त्तिकोत्थानं भज्येत। एवं चैकशेषविषयरूपसमुदायादेकत्वं संख्याविशिष्टविभक्तौ परत एकशेष

१ पृथक् प्रस्थानतया। इ॥ २ अ १। पा २। सू ६५॥

किम्प्रयोजनम्। पृथग् विभक्तिप्रतिषेधार्थम्। पृथग् विभक्त्यन्तानां मा भूत्। ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि। न वार्थविप्रतिषेधाद्युगपद्वचनाभावः। वा॥ न वैष दोषः। किं कारणम्। अर्थविप्रतिषेधात्। विप्रतिषिद्धावेतावर्थौ कर्त्ता सम्प्रदानमित्यशक्यौ युगपन्निर्देष्टुम्। तयोर्विप्रति-

प्रवृत्तिनिवृत्तिविषयेति प्रतिपत्तिगौरवप्रसङ्गः। अवरतोद्वयोरिति। भा। यदा त्रयाणामेकः शिष्यते तदा द्वयोर्निवृत्तिर्वक्तव्या व्याख्येयेत्यर्थः। शेषशब्दस्य निवृत्तिविशिष्टावस्थानवाचित्वात्। यदा तु द्वयोरेकशेषस्तदैकस्य निवृत्तिः। चतुष् प्रभृतीनां त्वेकशेषे त्रिप्रभृतीनां निवृत्तिरिति प्रवृत्तिनिवृत्तिलक्षणा-

सरूपाणामेकशेष एवेत्यपरनियमाश्रयणात्। तस्मात् घटकुम्भौ कुम्भकुम्भौ माहृभ्यां चेति पाक्षिकमनिष्टत्रितयं प्राप्तं सूत्रेणानेन वार्यते। "घटावि-

इति बोध्यम्॥ ननु विरूपाणां भिन्नार्थानां नैकस्यानेकार्थाभिधानशक्तिमत्त्वमित्येकशब्दाप्रयोगान्नानेकशेष आरम्भणीयोऽत आह

प्रयोगात्त्विति। (कै)

"व्युत्पादनार्थं वा" इति पाठे "वा" शब्दस्यार्थः। क्वचिद् "चे"त्येव पाठः॥

प्रयोगानुसरणे इति। (कै)

प्रयोगाणां शास्त्रेणानुसरणे अन्वाख्याने इत्यर्थः॥

लाघवायेति। (कै)

सुराशब्दोपदेशेनापशब्दनिवृत्तिवदेकशेषारम्भेणानेकशेषनिवृत्तेः सिद्धत्वादिति भावः॥

द्वन्द्वं बाधिष्यते। सावकाश एकशेषः। कोऽवकाशः। तिङन्तान्यवकाशः॥ यदि पुनः पृथक् सर्वेषां विभक्त्यन्तानामेकशेष उच्यते। किं कृतं भवति। कश्चिद्वचनलोपः परिहृतो भवति। विभक्त्यन्तानामेकशेषे (वा) विभक्त्यन्तानामेकशेषे विभक्त्यन्तानामेव तु निवृत्तिर्भवति। एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम्। वा॥ एकविभक्त्यन्तानामिति तु वक्तव्यम्।

प्रत्यायकः स्यात्। न हि सतोऽसती शक्तिराचार्य्येण कर्तुं शक्यते। मन्दबुद्धिव्युत्पादनार्थं च यथास्थितप्रयोगानुसरणे कोनुरोधः सरूपैकशेषारम्भे न पुनर्विरूपानेकशेषारम्भे। लाघवायैकशेषारम्भश्चेत्तन्न। लघीयसी विरूपप्रतिपत्तिः। तत्र हि प्रवृत्तिविषया बुद्धिरेकरूपैव भवति। एकशेषे तु

श्लिष्टरूपकस्थल इव तन्त्रन्यायाश्रयेण पाक्षिक एकशेषो मातृमात्रोः स्यादेवेति वाच्यम्। यान्येकविभक्तौ सरूपाण्येव तेषामेवैकशेष इति नियमात्। न चैवं घट घटाविति पाक्षिकं दुर्वारमिति वाच्यम्। तन्त्रावृत्त्याद्याश्रयणेन

वित्यावश्यकम् अन्यथा हरितवर्णविशिष्टस्त्रीहरिणस्त्रीवाचकयोर्हरिणीशब्दयोस्तद्धिते वैरूप्येणानेकशेषापत्तेः। विभक्तिसामानाधिकरण्येन च वैरूप्यान्वयोऽन्यथाऽसम्भवात्। तच्चेदं न विधायकम् "[1]चार्थे द्वन्द्व" इत्यनेनैवसिद्धेः किन्तु नियमार्थं तेन लोकसिद्धसहविवक्षाविषयं तत्र व्यावृत्तिः। तथा विरूपाणामेव द्वन्द्व इति च नियमः। अन्यथैकशेषारम्भेणास्य समफलकत्वानापत्तिः। तन्न्यासे हि स। येन नाप्राप्तिन्यायेन द्वन्द्वबाधक इति सरूपाणां[2] द्वन्द्वाभावस्पष्टत्वात्। अनेकशेषपदेन चावृत्त्या विरूपाणां[3] तन्त्रन्यायसिद्धलौकिकैकशेषाभावोऽपि बोध्यते॥ न वा स्वार्थस्यैकशेषारम्भे कथं सिद्धिः। आवृत्त्यासरूपाणामेवैकशेष इति नियमस्याप्यङ्गीकारात्

१ अ २। पा २। सू २९॥ २ द्वन्द्वाभावस्येष्टत्वात्। क॥ ३ तत्र॥

द्वन्द्वप्रतिषेधं च वक्ष्यति तदर्थं पुनश्चोद्यते॥ द्विवचनबहुवचनविधिः। वा॥ द्विवचनबहुवचनानि विधेयानि। वृक्षश्च वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति॥ द्वन्द्वप्रतिषेधश्च। वा॥ द्वन्द्वस्य च प्रतिषेधो वक्तव्यः। वृक्षश्च वृक्षश्च वृक्षौ। वृक्षश्च वृक्षश्च वृक्षश्च वृक्षा इति। चार्थे,द्वन्द्वः (२। २। २९) इति द्वन्द्वः प्राप्नोति। नैष दोषः। अनवकाश एकशेषो

नादिरूपानेकशेषः किमिति नारभ्यत इति प्रश्नः। प्रयोगात्तु शब्दशक्तावनुगम्यमानायां न किं चिदारब्धव्यम्। द्रव्यपदार्थपक्षेपि स्वभावादेकः शब्दोऽनेकमर्थं द्व्यादिवत् प्रत्याययिष्यति। अन्यथा एकशेषारम्भेपि कथं

त्तरसूत्रादेवकारोऽत्रानुवर्त्यते। तेन एकविभक्तौ यानि सरूपाण्येवेति व्याख्यानात् परिच्छेदवाचिनश्च "अमृन्" (६। ४। ११) इति सर्वनामस्थाने दीर्घविधानात् असारूप्यादेकशेषाभावः। न च वाचनिकैकशेषविरहेऽपि

विरूपानेकशेष इति। (कै)

नन्वनेकशेष इत्यस्यानेकस्य शेष इत्यर्थो वा एकशेषो नेत्यर्थो वा एकशेषभिन्नो भवति इत्यर्थो वा। नाद्यः। त्रिषु प्रतिपाद्येषु द्वयोः प्रयोगापत्तेः। शेषशब्दस्वारस्येनैकनिवृत्तेरावश्यकत्वात्। न द्वितीयः। एकशेषाप्राप्त्याऽसंभवात् इति चेन्न। तृतीयेऽदोषात् तत्रापि भिन्न-शब्देन द्वन्द्व एव न तु वाक्यं "[१]वृद्धो यूना" इत्यादौ प्रसिद्धैकशेषस्य पुष्पवन्तौ इति न्यायेन सह विवक्षाविषयस्यैव सत्त्वेन तद्भिन्नस्य सह विवक्षाविषयस्य शास्त्रीयस्यैव ग्रहीतुमुचितत्वात्। तत्रेदं वचनं न घटपटावित्यादिविषयम् अप्रत्ययशब्दनिवेशे शब्दानान्तुल्यरूपताया बीजत्वेन तदभावेन तस्याप्राप्तेः। किन्तु जननीपरिच्छेदकादिवाच-कमात्रादिशब्दविषयं तयोरौजसादौ वैरूप्यात्। अत्रापि विभक्ता-

१ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। १। २। ६५॥

समासे प्रकृते (२। १। ७२–गणसू.) तिङ्समासो वक्तव्यः॥ तिङ्विधि-प्रतिषेधश्च। वा॥ तिङ्च कश्चिद्विधेयः कश्चित् प्रतिषेध्यः। पचति च पचति च पचतः। तः शब्दो विधेयस्तिशब्दः प्रतिषेध्यः॥ यदि पुनरसमास एकशेष उच्यते। असमासे वचन लोपः। वा॥ यद्यसमासे वचन लोपो वक्तव्यः॥ ननु चोत्पत्तैव वचनलोपं चोदिताः स्मः। द्विवचनबहुवचनविधिं

विवक्षितानि तावतां शब्दानामेकैकार्थोपस्थयाणां प्रयोगे प्राप्ते एकशेषारम्भ इत्यर्थः॥ किमिदमिति। भा॥ यदि हेतु रहितं दृष्टान्तमाश्रित्य विरूपा-नेकशब्दप्रयोगदर्शनात्सरूपैकशेष आरभ्यते तदा सरूपैकशब्दप्रयोगदर्श-

जननी वाचिनोरपि निषेधापत्तेः तत्कथं शब्दरूपपरे स्वान्तर्गते निषेधप्रवृत्ति-रिति चेत् "प्रकृतिवदनुकरणम्" इत्यतिदेशादिति गृहाण। सूत्रमते

अनेकशब्दत्वमिति । (भा)

अनेकशब्दत्वमेवेत्यर्थः ॥

एकेनापीति । (भा)

अपिना वाक्यसंग्रहः । शास्त्रेण सह विवक्षाविषयशास्त्रीयद्वन्द्वस्यैव वारणाद् इति भावः ॥

किमिदमिति । (भा)

अक्षा इत्यादावेवाप्रत्यर्थशब्दनिवेशस्यापि दृष्टत्वेन विरूपविषयेऽपि लाघवायैकशब्दप्रयोग एव प्राप्तेऽनेकशब्दप्रयोगाय विरूपाणामनेकशेष एव कुतो नारभ्यत इत्यर्थ इत्याहुः ॥

हेतुरहितमिति । (कै)

प्रत्यर्थमित्यादिस्तु न हेतुः । अपक्षवृत्तित्वादिति भावः ॥ अत एव भाष्ये "दृष्टान्तमास्थाय" इत्युक्तम् ॥

च स्वसारौ च स्वसारः । अङ्गाश्रये ([२ । ४ । ७१ ॥ ६ । ३ । २५ ॥] ७ । ३ । ११० ॥ ६ । ४ । ११) कृतेऽसारूप्यादेकशेषो न प्राप्नोति । इदमिह सम्प्रधार्यम् । अङ्गाश्रयं क्रियतामेकशेष इति किमत्र कर्त्तव्यम् । परत्वादङ्गाश्रयम् । तिङ्समासे तिङ्समासवचनम् । वा ॥ तिङ्समासे तिङ्समासो वक्तव्यः ॥ एकं तिङ्ग्रहणमनर्थकम् । समासे तिङ्समास इत्येव । नानर्थकम् । तिङ्-

---

शब्दाप्रयोगः । आश्रयगतसंख्याप्रतिपादनाय च द्विवचनबहुवचने भविष्यत इति प्रश्नः । द्रव्यं पदार्थ उपलक्षणं त्वाकृतिरिति दर्शने सूत्रमारब्धव्यमित्याह । प्रत्यर्थमिति । भा । यावन्ति द्रव्याणि विशिष्टगुणक्रियाविषयतया

प्रवृत्ते मातृमात्रोः प्रतिषेधः सरूपत्वादिति वार्त्तिके स्वान्तर्गते मातृमात्रोरित्यत्रापि निषेधप्रवृत्तिः । नन्वर्थविशेषोपहितयोरेव तत्रानुवादः । अन्यथा

विशिष्टगुणक्रियाविषयतयेति। (कै)

तदाश्रयत्वेनोपलक्षितानि इत्यर्थः॥ [1]अपरे तु "किमर्थम्" इति प्रश्नभाष्यस्य तन्त्रेणैव सिद्धिरित्याशयः। तन्त्रकारणं च शब्दानां तुल्यरूपता यथाक्षा भज्यन्तां भक्ष्यन्तां दीव्यन्तामिति॥

प्रत्यर्थमिति। (भा)

अक्षा दीव्यन्तामक्षा भज्यन्तामक्षा भुज्यन्तामित्यादौ वाक्ये प्रत्यर्थशब्दनिवेशस्यापि दर्शनात् कदाचित् तादृशप्रयोगे सहविवक्षायां प्राप्तद्वन्द्वनिवृत्त्यर्थं सूत्रमावश्यकमित्याशयः॥

किमिदं प्रत्यर्थमिति। (भा)

अर्थाविर्थौ प्रतीत्यादेरपि तदर्थस्य संभवात् प्रश्नः। एकवचनान्तेन विग्रह इत्युत्तरम्॥ नैकेनेति। (भा) नैकेनैवेत्यर्थः॥

१ अपरे इत्यारभ्य यथाक्षा इत्यन्तं नास्ति क पुस्तके॥

न्तोदात्तत्वम्। समासान्तोदात्तत्वे च दोषो भवति। स्वर॥ समासान्त। ऋक्च ऋक्च ऋचौ। समासान्ते (५। ४। ७४) कृतेऽसारूप्यादेकशेषो न प्राप्नोति। इदमिह सम्प्रधार्य्यम्। समासान्तः क्रियतामेकशेष इति किमत्र कर्त्तव्यम्। परत्वात् समासान्तः। समासान्ते च दोषो भवति॥ अङ्गाश्रये चैकशेषवचनम्। वा॥ अङ्गाश्रये च कार्य्ये एकशेषो वक्तव्यः। स्वसा

लुक् प्रसङ्गः। लौकिकस्य गोत्रस्य तत्र ग्रहणमिति परिहार उत्तरत्र वक्ष्यते इतीह नोक्तः॥ पय इति। भा। उत्तरत्रार्थविप्रतिषेधादिति प्रत्याख्यानं करिष्यते। किमर्थं पुनरिति। भा। जातिः शब्दार्थः। तस्यास्चैकत्वात् अनेक

विषयविवेचनं तु "अ इ उण्" (शिवसू– १।) इत्यत्रैव कृतम्। अत एव जननी वाचिनो मातृशब्दस्य धान्यमापवाचिनस्तृजन्तस्य च एकशेषं निषेद्धुं

जातिरिति ॥ (कै)

द्रव्यमिति । (कै)

[1]तत्र प्रत्यर्थं शब्दनिवेश इति न्यायात् तत्तद्व्यक्तिप्रतिपादनाय नानाशब्दप्रयोगः प्राप्नोतीत्यर्थः ॥

उपलक्षणं त्विति । (कै)

यो रक्तवासाः स देवदत्त इत्यादौ [2]रक्तवासस्त्वद् इत्यर्थः । अन्वयानन्त्यात् तत्र शक्तिग्रहो न स्यात् । केवलाव्यक्तिरेव शब्दार्थः । [3]जातेः शक्तिग्रहे प्रकारत्वेऽपि न तत्र शक्यतावच्छेदकता नापि शक्यता ॥ शुद्धव्यक्तेरेव च शब्दाद् भानं शब्दस्यैव बोधे प्रकारतया न निर्विकल्पत्वं तस्य । तत्पक्षे चानुगतधर्माभानान्नतेनानुगतानेकव्यक्तिबोधसम्भव इति सूत्रमिति भावः ॥

---

१ तत्र हि प्रत्यर्थम् । इ ॥ २ रक्तवासस्त्ववत् । क । इ ॥
३ केवलाव्यक्तिरेवशब्दार्थः जातेः शक्तिग्रहो न स्यात् इत्यधिकम् क पुस्तके ॥

समास इति चेत् स्वरसमासान्तेषु दोषः । वा ॥ समास इति चेत् स्वरसमासान्तेषु दोषो भवति । स्वर । अश्वश्चाश्वश्च अश्वौ । समासान्तोदात्तत्वे (६ । १ । २२३) कृत एकशेषः प्राप्नोति । इदमिह सम्प्रधार्य्यम् । समासान्तोदात्तत्वं क्रियतामेकशेष इति किमत्र कर्त्तव्यम् । परत्वात् समासा-

---

चापत्ये" (५ । ३ । ६६) इति लुप् ततः काश्यपस्य काश्यपस्य काश्यपस्येति प्रतिकृतिप्रचयविवक्षायामेकः काश्यपशब्दः प्रयुज्यते सच बह्वर्थोऽनन्तस्येति

योगः वाक्यापरिसमाप्तिन्यायादिति वाच्यम् । उद्देश्यतावच्छेदकरूपाक्रान्ततया "तुल्यास्यप्रयत्नम्" (१ । १ । ६) इति वत् स्वस्मिन्नपि प्रवृत्तेः । एतद्

लौकिकस्य गोत्रस्येति। (कै)

प्रवराध्यायप्रसिद्धस्येत्यर्थः। "यस्कादिभ्य" (२। ४। ६३) इत्यतो "गोत्र" इत्यनुवृत्त्या गोत्रबहुत्वे वर्त्तमानस्य यञन्तस्य लुगिति व्याख्यानात्। इदं च[1] प्रकृतिबहुत्वे वर्त्तते। न तु गोत्रबहुत्वे इत्यदोष इति भावः॥

लौकिकस्येति (कै)

सिद्धान्तस्वरूपकथनम्॥ एकग्रहणविषयः प्रश्न इत्यभिप्रायेणोत्तरयति भाष्ये

पय इति। (भा)

भिन्नविभक्तिव्यावृत्त्यर्थमेकग्रहणमिति भावः॥ ननु भावे सरूपाणां द्वन्द्वापत्तिरत आह

१ प्रतिकृतिबहुत्वे। क॥

श्रवणं प्रसज्येत। यत्र च संयोगान्तलोपो नास्ति तत्र च न सिध्यति। क्व च संयोगान्तलोपो नास्ति। द्विवचनबहुवचनयोः॥ यदि पुनः समास एकशेष उच्यते। किं कृतं भवति। कश्चिद्वचनलोपः परिहृतो भवति॥ तर्त्हि समासग्रहणं कर्त्तव्यम्। न कर्त्तव्यम्। प्रकृतमनुवर्त्तते। क्व प्रकृतम्। तिष्य पुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् (१। २। ६३) इति॥

ष्विति। भा। आदेशपक्षेऽपि वचनसामर्थ्यात् सारूप्यात् यञ्वुद्युत्पादाद्यन्तमेतदित्याश्रीयते॥ काश्यपा इति। भा। काश्यप इवायं तत्प्रतिकृतिरिति "इवे प्रतिकृतौ" (५। ३। ९६) इति विहितस्य कनो। "जीविकार्थे

सरूपाः। "ज्योतिर्जनपद" (६। ३। ८५) इति समानस्य स भावः। सरूपाश्च सरूपाश्च तेषामिति एकशेषेण व्याख्यानात्। न च स्वाङ्गे स्वव्यापारा॰

विरूपाणामिति। (कै)

अन्ययशब्दयोरपि गर्गापत्यत्वेनैव बोधकत्वात् समानार्थत्वं बोध्यम् ॥

वत् (कै)

इत्युक्तिस्तु संप्रतिपन्नविषयाभिप्रायेण ॥ नन्वादिश्यमानगर्गशब्दान्तर्गतयशब्दस्यान्यत्वेन कथं यञन्तत्वापीत्यत आह

आदेशपक्षेऽपीति॥ (कै)

वचनसामर्थ्यादिति। (कै)

लुग्वचनसामर्थ्यादिति भावः ॥

यञ् बुद्धीति। (कै)

एतेनावयवस्याप्रत्ययत्वात् लुगसंभव इति परास्तम् ॥

इयानिति यथा (५। ३। १७, ३॥ ६। ४। १४८॥ ५। २। ४०॥ ६। ३। ९०॥ ६। ४। १४८)। अस्तु। संयोगान्तलोपेन सिद्धम् (८। २। २३)। कुतो नु खल्वेतत् परयोर्दत्त्शब्दयोर्निवृत्तिर्भविष्यति न पुनः पूर्वयोरिति। तच्चैतत् स्यात् पूर्वनिवृत्तावपि सत्यां संयोगादिलोपेन सिद्धमिति (८। २। २९)। न सिध्यति। तत्रावरतो द्वयोः सकारयोः

सिध्यति। यदा तु विरूपाणामपि समानार्थानामेकशेषवदेक आदेशः सप्रकृतिकः क्रियते तत्र गर्गय इत्यस्यान्ययोश्च यशब्दयोर्गर्गयशब्द आदेशः। तत्र यशब्दान्तस्य बहुषु वृत्तिः न तु प्रत्ययमात्रस्येति भावः। यञन्तं यद् बहु-

---

तु प्राधान्येन भानमित्यन्यदेतत्। न चैवमपि घटकलशावित्यादिद्वन्द्वापत्तिः। विरूपाणामपि समानार्थानामिति वार्त्तिकेन एकशेषात्। वस्तुतस्तु सौत्र एवायमर्थः। रूप्यते बोध्यते इति रूपम्। अर्थः समानं रूपं येषामिति

बहव इति। (कै)

अपत्यानां बहुत्वात्॥ नन्वेकस्याः प्रकृतेः कथं बहवः परेऽत आह

यञा कृतेश्चेति। (कै)

यद्यपि जातेरेकैकव्यक्तिव्यङ्ग्यत्वं व्यक्तिद्वारकमेव परत्वं च तथाप्यव्यवहितव्यक्तिद्वारकं सर्वगतजातेः परत्वमित्यभिमानः। व्यक्तिपक्षेऽपि विजातीयव्यक्तिव्यवधानमेव व्यावर्त्यते न सजातीय तद्व्यवधानमित्यन्ये॥

प्रत्ययानामेवेति। (कै)

समानाकारत्वादिति भावः॥ इदं चिन्त्यम् एकविभक्तौ इत्युक्त्या तत्प्रकृतित्वाऽयोग्यानां केवलप्रत्ययानामेकशेषाप्राप्तेः। गर्गसहितानामेव हि तत्प्रकृतिता॥

प्राप्नोति। किमुच्यत एकशेषे पृथग्विभक्त्युपलब्धिरिति यदा समयः कृतो न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति। तदाश्रयत्वात् प्राप्नोति। यत्र हि प्रकृतिनिमित्ता प्रत्ययनिवृत्तिस्तत्राप्रत्ययिकायाः प्रकृतेः प्रयोगो भवति। अग्निचित् सोमसुदिति (६। १। ६८) यथा। यत्र च प्रत्ययनिमित्ताप्रकृतिनिवृत्तिस्तत्राप्रकृतिकस्य प्रत्ययस्य प्रयोगो भवति। अधुना

देकैव। यञ् प्रत्ययास्तु बहवः। यञाकृतेश्च एकत्वाद् व्यवधानाभावादनेकस्यापि प्रत्ययस्य परत्वं न विरुध्यते। तत्र गर्ग य य य इतिस्थिते यदा गर्गशब्दमुक्त्वा प्रत्ययानामेवैको यशब्द आदेशः क्रियते तदा तस्य बह्वर्थत्वाल्लुक्

द्वन्द्वे" (२। २। २९) इति सूत्रेण साहित्यमात्रे तद्विधानात्। तस्य चेतरेतरयोगद्वन्द्वे एकशेषे च विशेषणत्वं प्रयोगोपाधित्वं वा। समाहारद्वन्द्वे

स्यात्। सूत्रं तु अनेकाल्सु चरितार्थं ततः सवर्णदीर्घे "[1]दीर्घाद्" इति पूर्वसवर्णदीर्घनिषेधे यणियाविति स्यादित्याहुः॥ तन्न "सरूपाणामि"ति बहुवचनेन प्रत्येकं स्थानिवत्त्वबोधनेन रमागमन्यायेन सर्वनिवृत्तेरदोषात्॥ "लोप्यलोपि" पदयोः पौनरुक्त्यमाशङ्क्याह

लोपनीयस्येति। (कै)

लोपपदम् "[2]ल्युट्हलोरिति" ण्यदन्तम्॥

सम्बन्ध इति। (कै)

कृत्तद्धितसमासेभ्यो भावप्रत्ययस्य सम्बन्धाभिधायकत्वादिति भावः॥

एकैवेति। (कै)

गर्गस्यापत्यानीति विवक्षणादिति भावः॥

---

१ अ ६। पा १। सू १०५॥ २ अ ३। पा १। सू १२४॥

अप्रातिपदिकत्वात्। ननु चार्थवत् प्रातिपदिकमिति (१।२।४५) प्रातिपदिकसंज्ञाभविष्यति। नियमान्न प्राप्नोति। अर्थवत् समुदायानां समासग्रहणं नियमार्थमिति (१।२।५४)॥ यदि पुनः पृथक् सर्वेषां विभक्तिपराणामेकशेष उच्यते। पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिस्तदाश्रयत्वात्। वा॥ पृथक्सर्वेषामिति चेदेकशेषे पृथग्विभक्त्युपलब्धिः

ह्यनुदात्तस्य ह्यनुदात्त आदेशः प्राप्नोति॥ लोप्यलोपितेति। भा। लोपनीयस्य लोपित्वं लोपसम्बन्धो न प्राप्नोतीत्यर्थः॥ गर्गा इति। भा। प्रकृतिरर्थाभेदा-

---

मुक्तसंशयमिति वार्त्तिकं दृष्ट्वा नामार्था एवेहोदाहरणमिति भ्राम्यन्तः परास्ताः। न च पदार्थतावच्छेदकभेदाभावाद् द्वन्द्वप्रसक्तिर्नेति वाच्यम्। "चार्थे

दाविति। (कै)

अत्रोदात्तशब्दो धर्मिपरः॥ आदेशस्यापि तथात्वे एकशेषानर्थक्यमत आह

आदेशोऽपीति। (कै)

अत्रोदात्तशब्दधर्मपर इति भावः। विधीयमानानेकोदात्तस्य "उभे वनस्पत्यादिषु युगपद्" (६। २। १४०) इत्यादौ समावेशदर्शनादिति तात्पर्य्यम्॥

तेनेति। (कै)

पर्य्यायेणेति भावः॥ नन्वश्वशब्दे श्रूयमाणोदात्तानुदात्तयोरनुग्रहायान्तरतमपरिभाषयोभयस्वरक एवादेशो भविष्यतीति चेन्न। तेनैव रूपेण सादृश्यग्रहणमित्यत्र नियामकाभावेन पर्य्यायस्य दुर्वारत्वात्। यत्तु इश्व इश्व इत्येकशेषे एक आदेशोऽलूपत्वादन्यस्य

श्रिष्यते तत्रावरतो द्वयोः सरूपयोर्निवृत्तिर्वक्तव्या। स्यात्। एवमप्येतस्मिन् सति किञ्चिदाचार्य्यः सुकरतरकं मन्यते सुकरतरकं चैकशेषारम्भं मन्यते॥ किं पुनरयमेकविभक्तावेकशेषो भवति। एवं भवितुमर्हति। एकविभक्ताविति चेन्नाभावाद्विभक्तेः। वा॥ एकविभक्ताविति चेत्तन्न। किं कारणम्। अभावाद्विभक्तेः। न हि समुदायात् परा विभक्तिरस्ति। किं कारणम्।

दोषमाह। अश्वस्याश्वस्येति। भा॥ द्व्युदात्तवत इति। भा। द्वावुदात्तवन्तावश्शब्दौ यस्य समुदायस्य स द्व्युदात्तवान् समुदायः। आदेशोऽपि द्वावुदात्तवन्तावुदात्तगुणयुक्तावकारौ यस्येति द्व्युदात्तवानुच्यते। एतच्चोपलक्षणं तेन

कस्यानेकविशकलितशब्दप्रयोगस्य घटोऽयं घटोऽयमिति बहुशो दर्शनेन तद्देव सह विवक्षायां घटावित्यादिद्वन्द्वस्य दुर्वारत्वात्। एतेन व्यर्थेषु च

शासनत्वाच्च साधुरित्याद्यध्याहारः। एवं च तेषां मध्ये एकस्य साधुत्वेऽपरस्यासाधुत्वेनार्थान्निवृत्तिरिति भावः॥

षष्ठीति। (कै)

निर्दिश्यमानस्यादेशा इत्यर्थमावश्यकस्य व्याख्यानापेक्षा गौरवपरिहाराय नियमार्थत्वमप्यङ्गीकार्य्यमिति निर्धारणे षष्ठी न युक्तेति भावः॥

अन्तरतम इति। (कै)

शब्दतोऽर्थतश्चेति आदिः तमग्रहणादिति भावः॥ ह्रुदात्तशब्दस्य बहुव्रीहित्वे मतुप् न स्यात् उक्तार्थत्वात् कर्मधारयात् तु मत्वर्थीयो नेष्ट इत्यत आह

रेण यत्नं न सिध्यति। तस्मादेकशेषः। वा॥ एवमर्थमिदमुच्यते॥ अस्ति प्रयोजनमेतत्। किं तर्हीति। किमिथं प्रत्यर्थं शब्दा अभिनिविशन्त इत्येतं दृष्टान्तमास्थाय सरूपाणामेकशेष आरभ्यते न पुनरप्रत्यर्थं शब्दा अभिनिविशन्त इत्येतं दृष्टान्तमास्थाय विरूपाणामनेकशेष आरभ्यते। तत्रैतत् स्याल्लघीयसी सरूपनिवृत्तिर्गरीयसी विरूपप्रतिपत्तिरिति। तच्च न। लघीयसी विरूपप्रतिपत्तिः। किं कारणम्। यत्र हि बहूनां सरूपाणामेकः

संख्याया अविवक्षा स्यात्। यथा ग्रहं संमार्ष्टीति भावः॥ शेषग्रहणमिति। भा। सरूपाणामेकः साधुर्भवतीति वाक्यशेषोऽध्याहरिष्यत इति भावः। आदेशोऽयमिति। भा। "षष्ठीस्थानेयोगे"ति नियमात्। तत्र को दोष इति। भा। अन्तरतम एक आदेशः प्रवर्त्तिष्यत इति भावः॥ इतरस्तु स्वरे

अपवादकतेति पक्षेऽपवादशब्दस्य इत्थमेव व्याख्यातत्वात्। अत एव घटौ घटा इत्यादीन्यपीहोदाहरणानि। तत्रापि ऐच्छिकस्यानेकव्यक्तिबोधोद्देश्य-

एवं चेतरनिवृत्तिमदवस्थानं तदर्थः। तत्र यद्यपि स्थितेः सिद्धत्वात् निवृत्तावेवार्थतो विधेयता तथापि शब्दतस्तस्यैव विधेयत्वाद्व्याप्तिन्यायेन द्विबहूनामेवावस्थानस्य निवृत्तिरिति भावः॥

संस्कार्य्यत्वादिति। (कै)

शिष्यमाणत्वविधानेन शेषपदार्थाश्रितस्य संस्क्रियमाणत्वादिति भावः॥

सरूपाणामिति। (भा)

षष्ठ्याविधेयबोधकशेषपदेन सामानाधिकरण्यान्वययोग्यः सम्बन्धी आश्रियते स चैकवचनान्त एव यद्यपि तथापि तस्य विधेयेन शिष्यमाणत्वेन संस्क्रियमाणत्वेनानुवाद्यत्वादेकत्वाविवक्षेति तात्पर्य्यम्॥

सरूपाणामिति। (कै)

लक्ष्यानुसारतो व्याख्यानमाश्रित्यैषा निर्धारणे षष्ठी साध्वनु-

---

शन्ते। किमिदं प्रत्यर्थमिति। अर्थमर्थं प्रति प्रत्यर्थम्। प्रत्यर्थं शब्दनिवेशादेतस्मात् कारणान्नैकेन शब्देनानेकस्यार्थस्याभिधानं प्राप्नोति॥ तत्र को दोषः। तत्रानेकार्थाभिधानेऽनेकशब्दत्वम्। वा॥ तत्रानेकार्थाभिधानेऽनेकशब्दत्वं प्राप्नोति। इष्यते चैकेनाप्यनेकस्याभिधानं स्यादिति तत्रान्त-

---

संख्याया विवक्षितत्वादेक एवावशिष्यत इति प्रश्नः॥ द्विबह्वोरिति। भा। द्वित्वबहुत्वविषयस्यानेकस्य शब्दस्येत्यर्थः। तत्र भावसाधनपक्षे व्याप्तिन्यायाश्रयेणानेकस्यापि शेषः स्यात्। कर्मसाधनपक्षेऽपि संस्कार्य्यत्वात् प्राधान्यात्

द्वन्द्वस्याप्राप्तिरेव फलिता भवति। अत एव एकशेषस्य द्वन्द्वापवादकतेत्युक्तदोषः। "इको गुणवृद्धी" (१। १। ३) इत्यस्य "अलोऽन्त्य" (१। १। ५२)

कर्मसाधनेति। (कै)

तत्र हि सरूपाणां सम्बन्धी शिष्यत इत्यर्थः। तत्राक्षिप्तसम्बन्धिपदे आक्षेपकसामानाधिकरण्याय एकवचनान्ते एकत्वविवक्षेति भावः॥ संख्येयार्थकत्वे द्विबहुवचनानुपपत्तिः। संख्यार्थत्वेऽर्थाऽसङ्गतिरत आह

द्वित्वेति॥ (कै)

"द्विबह्वोरि"ति विषयसप्तमीति भावः॥ शेषशब्दोऽत्र नोपयुक्तादन्यस्मिन् असम्भवात् तदाह

तत्र भावेति॥ (कै)

व्याप्तीति। (कै)

अत्र शास्त्रे "[1]आद्युदात्तश्च" इत्यादिग्रहणेन [2]प्राग्दीश्वरादिति रेफोच्चारणेन प्राथम्यन्यायापेक्षया व्याप्तिन्यायस्य प्राबल्यबोधनात्।

---

१ अ ३। पा १। सू ३॥ २ अ १। पा ४। सू ५६॥

काश्यपप्रतिकृतयः काश्यपा इति (४। १। १०४॥ ५। ३। ६६, ६६)॥ एकविभक्ताविति किमर्थम्। पयः पयो जरयति। वासो वासश्छादयति। ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहीति॥ किमर्थं पुनरिदमुच्यते। प्रत्यर्थं शब्दनिवेशान्नैकेनानेकस्याभिधानम्। वा॥ प्रत्यर्थं शब्दा अभिनिवि-

---

मित्याह श्रुतौ चेति। भा। श्रोत्रोपलब्धावित्यर्थः। अथवा श्रोत्रेन्द्रियं श्रुतिरुच्यते। एकग्रहणमिति। भा। शेषणं शेष इति भावसाधनपक्षे प्राथम्यादेकस्यैव शेषो एष्यति। शिष्यत इति शेष इति कर्मसाधनपक्षेऽप्येकत्व-

---

स्यापि तन्त्रेणानेकार्थताभ्युपगम्यते। एवमपि सर्वत्र तन्त्रेणैव बोधनीयमपि नियमाभावात् पाक्षिको द्वन्द्वो दुर्वारः। आरब्धे त्वेकशेषे सुबन्तद्वयविरहात्

ज्ञापितमिति। (कै)

शब्दार्थविषये क्वचिदुक्तन्यायाप्रवृत्तेर्ज्ञापनादित्यर्थः॥ श्रोत्रेन्द्रियस्य करणत्वेऽप्याधारत्वासम्भवादाह

श्रोत्रोपेति। (कै)

भावसाधनः श्रुतिशब्द इति भावः॥

अथवेति। (कै)

श्रुत्यवच्छेदेनेत्यर्थः। करणसाधनः स इति भावः। आद्ये ग्रहणं विषयता द्वितीये तु प्रतीतिरिति विवेकः। प्राधान्येन श्रोत्रेन्द्रियग्राह्यं वस्त्वत्र रूपशब्देनोच्यते इति तात्पर्य्यम्॥

शेषणमिति। (कै)

अत्रेतरनिवृत्तिविशिष्टमवस्थानं विधेयं तच्चैकस्य द्वयोरित्याद्याकाङ्क्षायां प्राथम्यादेकस्यैव भविष्यतीत्यर्थः॥

स्थानिनो ह्युदात्तवानादेशः प्रसज्येत। लोप्यलोपिता च न प्रकल्प्येत। तत्र को दोषः। गर्गा वत्साः। विदा उर्वाः। अत्रो बह्वषु यत्रो बह्वष्वित्युच्यमानो लुग्न प्राप्नोति (२। ४। ६४)। माभूदेवम्। अञन्तं यद्बह्वषु यञन्तं यद्बह्वष्वित्येवं भविष्यति। नैवं शक्यम्। इह हि दोषः स्यात्।

भवतीति प्रश्नः॥ शब्दार्थश्चेति। भा। स्वं रूपमित्यत्र रूपग्रहणेन ज्ञापितं व्याकरणे रूपवदर्थोऽप्यङ्गीक्रियत इति। ततस्स्वार्थरूपाभ्यां समानत्वं गृह्यतेत्यर्थः। शब्दानुशासनप्रस्तावाच्च शब्दसम्बन्धिरूपं गृह्यते न तु चक्षुर्ग्राह्य-

---

त्वमयोश्च तस्मिन्" इति श्रीहर्षः। "श्रियौनरेन्द्रस्य निरीक्ष्य तस्य" इति च। सकृच्छ्रुतात् सकृदर्थः प्रत्यय इति मते शब्दसारूप्येति द्वन्द्वः स्यात्।

"अन्तरङ्गत्वं" शब्दार्थप्रतीतेः पूर्वं नियमेन प्रतीयमानत्वम् अर्थो हि तद्विपरीतत्वाद्बहिरङ्गः॥ तथानुकरणदशायामप्रतीतेर्हेयश्च। शब्दस्य तु ज्ञानमात्रे भानात् स कुत्रापि न हेयः॥ उपदेशः सम्बन्धग्रहः। पर्य्यायाप्रतिपाद्यमानत्वमसाधारणत्वम्॥ ननु समानानामित्युक्तेऽपि वर्णकृतलाघवाभावोऽत आह

प्रतिपत्तीति॥ (कै)

यद्यपि सहमानेन इतियोगस्तथापि प्रवीणादिवद्रूढ एवायमिति भावस्तदाह

रूढशब्दत्वादिति। (कै)

सरूपशब्दस्तु "[1]ज्योतिर्जनपद" इति समानस्य सभावविधानादवयवानुसन्धानद्वारेणैव सादृश्यं प्रतिपादयतीति तात्पर्य्यम्॥

१ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु। ६। ३। ८५॥

भवति। रूपं निमित्तत्वेनाश्रीयते श्रुतौ च रूपग्रहणम्॥ अथैकग्रहणं किमर्थम्। सरूपाणां शेष एकविभक्तावितीयत्युच्यमाने द्विबह्वोरपि शेषः प्रसज्येत। एकग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ शेषग्रहणं किमर्थम्। सरूपाणामेक एकविभक्तावितीयत्युच्यमान आदेशोऽयं विज्ञायेत। तत्र को दोषः। अश्वश्चाश्वश्च अश्वौ। आन्तर्यतो ह्युदात्तवतः

माने भवति। रूढशब्दत्वात् समानशब्दस्य तुल्यार्थत्वावगमात्। सरूपाणामिति पुनरुच्यमाने पदद्वयार्थावगमपूर्वकान्यपदार्थावगमात् प्रतिपत्तिगौरवं

बन्तप्रातिपदिकानां प्रवर्त्तते। हरिणी मृगी हरितवर्णा च। तयोः सह विवक्षायां हरिण्यौ हरिण्यः। क्षितिक्षान्त्योः क्षमा। "वासो न सम्यक्

महाभाष्यप्रदीपोद्योतः ।

पाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः ॥

कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।
सर्वेषां न्यायबीजानां महाभाष्यनिबन्धने ॥

सरूपाणामेकशेष एकविभक्तौ । १ । २ । ६४ ॥

ननु अर्थकृतमपि साम्यं गृह्येतेति प्रश्नानुपपत्तिरत आह

रूपस्येति । (कै)

रूपग्रहणं किमर्थम् । समानानामेकशेष एकविभक्तावितीयत्युच्यमाने यत्रैव सर्वं समानं शब्दोऽर्थश्च तत्रैव स्यात् । वृक्षाः वृक्षा इति । इह न स्यात् । अक्षाः पादा माषा इति । रूपग्रहणे पुनः क्रियमाणे न दोषो

रूपग्रहणमिति । भा । रूपस्यान्तरङ्गत्वादहेयत्वादुपदेशानपेक्षणाच्च तत्कृतमेव समानत्वं गृहीष्यते । प्रतिपत्तिलाघवं च समानानामित्युच्य-

---

समानायां विभक्तौ यानि सरूपाण्येव दृष्टानि तेषां मध्ये एक एव शिष्यते । अनैमित्तिकत्वेनान्तरङ्गोऽयमेकशेषः सुबुत्पत्तेः प्रागेव द्वन्द्वा-

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO., 16, GREAT RUSSELL STREET, LONDON, W.C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1		0	6
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–3		1	2
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
Bodhicaryavatara of Cantidevi, Fasc. 1		0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–3 @ 2/ each ...		6	0
Çatapatha Brāhmaṇa, Fasc. 1–5		1	14
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, (English) Fasc. 1–2		1	8
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–16 @ /6/ each ..		4	14
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1–3		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–3 @ /6/ each		4	8
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta. (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ..		5	4
Nityacarapaddhati Fasc. I–III (Text) @ /6/		1	2
Nyayabinduṭīka, (Text		0	10
Nyāya Kusumāñjali Prakaraṇa (Text, Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–3 @ /6/ each		3	6
Padumawati Fasc. 1–3 @ 2/		6	0

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1005.

महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODDYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇASTRI.

VOL. II, FASCICULUS III.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1902.

PK
531
A15
1899
V. 2
pr. 3

LIBRARY
MAR 19 1969
UNIVERSITY OF TORONTO

Patanjali
Mahabhasyapradipodyotah

PK
531
A15
1899
v.2
pt.3